No. ६४४-घ

Title वेदान्तसारः

Author नृसिंहसरस्वती

Extent १८ Age १८५६

Subject वेदान्तशास्त्रम् · सम्पूर्णम्

नं० ६४८७ - घ

(वेदान्तशास्त्रम्) वेदांत सारः सुबोधिनी टीका सहितः

पत्राणि १८ (सम्पूर्णम्)

नं० ९४४ - घ

लिपिक : नृसिंह सरस्वती

संवत् १८५६

नं. ६४४-च
(वेदान्तशास्त्रम्) वेदान्तसारः सुबोधिनी टीकासहितः
पत्राणि १८ (सम्पूर्णम्)
कर्ता नृसिंहसरस्वती
संवत् १८५६

आनंदमयः १
विज्ञानमयः २
मनोमयः ३
प्राणमयः ४
अन्नमयः ५
इति पंचकोशाः

वेदांतसारसटीक प१८

[illegible]

॥श्रीगणेशाय नमः॥ कृष्णानंदं गुरुं नत्वा परमानंदमद्वयं वक्ष्ये वेदांतसारस्य टीकां नाम्ना सुबोधिनीं १ इह खलु कश्चिन्महापुरुषो नि
१ त्याध्ययनविध्यधीतसकलवेदराशीनां चिन्मात्राश्रयतद्रूपाद्यानंदविषयानाद्यनिर्वचनीयभावरूपाज्ञानविलासितानंतभवानुष्ठितका
म्यनिषिद्धवर्जितनित्यनैमित्तिकप्रायश्चित्तोपासनाकर्मभिः सम्यक्प्रसन्नेश्वराणामिष्टकाचूर्णादिसंघर्षितादर्शतलवदतिनिर्मलाश
यानां नलिनीदलगतजलबिंदुवद्धिरण्यगर्भादिस्तंबपर्यंतं जीवजातं स्वात्मवन्मृत्योरास्यांतर्गतं क्षणभंगुरं तापत्रयाग्निसंदह्यमानम २
कं निशमात्मन्यनुपश्यतामतिविवेकिनामत एव हि स्रक्चंदनादिविषयभोगे अमुत्रामुष्मिके हिरण्यगर्भाद्यमृतभोगेष्वपि वांताशन इवा
ति निर्विण्णमानसानां शमादिसाधनसंपन्नानां मायातत्तोऽधिगताखिलवेदार्थस्वादेहाद्यहंकारपर्यंतजडपदार्थविलक्षणस्वप्रकाशस्व स्व
रूपे प्रत्यगात्मनि ब्रह्मानंदलेशं प्राप्तानां तज्जिज्ञासूनां मलत्रयवत्तेन मूलाज्ञाननिवृत्तिपरमानंदावाप्तिसिद्ध्यै प्रकरणमारभमाणः
तत्समाप्तिप्रचयगमनादिफलकं शिष्टाचारप्राप्तं इष्टदेवतानमस्कारलक्षणमंगलाचरणमवश्यकर्त्तव्यतां प्रदर्शयन् लक्षणयानुबंधचतुष्ट
नं यं निरूपयन्नु परमात्मानं नमस्कुरुते अखंडमित्यादिना अखंडं सच्चिदानंदमवाङ्मनसगोचरं आत्मानमखिलाधारमाश्रयेभीष्टसिद्धये
अभीष्टस्य निःश्रेयसस्य सिद्ध्यै प्राप्त्यर्थमात्मानमाश्रये एकत्वेन प्रतिपद्ये इत्यर्थः नन्वविषयस्यात्मनः कथं प्रतिपत्तिरित्याशंक्याह अखि
लाधारमिति अखिलस्य चराचरस्य प्रपंचस्य विवर्त्ताधिष्ठानत्वेन कारणत्वज्ञातं बलेव प्रतिपद्ये न तु मुख्यमित्यर्थः नन्वेवं सति प्रतिपत्ति
विषयत्वेन दृश्यत्वापत्तिरित्याशंक्याह अवाङ्मनसगोचरमिति यतो वाचो निवर्त्तंत [illegible] इत्यादिश्रुतिभिरविषयत्वप्रति
पादनात् प्रतिपत्तिविषयत्वं कारणत्वोपलक्षितब्रह्मविषयत्वेनौपचारिकमिति भावः एवमपि कारणत्वेन मृत्पिंडवदनित्यत्वं शंकामापह ननु
रन्नाह सदिति नाशाभावोपलक्षितस्वरूपं सदेव सोम्येत्यादिश्रुतेः ननु तथापि जडत्वापत्तिरित्याशंक्याह चिदिति स्वप्रकाशचैतन्यस्वरूपमि
ति यावत् ननु तथापि पुरुषार्थत्वाभावात् किमित्याश्रयणीयमित्यत आह आनंदमिति परमानंदस्वरूपमित्यर्थः ननु भवितेपि तसुनेन शांतो
पाधिरिति न्यायेन प्रपंचस्याधिष्ठानव्यतिरिक्ततया प्रतीयमानत्वात् कथमद्वैतसिद्धिरित्याशंकां तत्पूर्णीकुर्वन्नाह अखंडमिति सजातीय

विजातीयस्वगतभेदशून्यमित्यर्थः अत्र सच्चिदानंदमिति प्रयोजनं अखंडमिति विषयः शास्त्रविषययोः प्रतिपाद्यप्रतिपादकभावः संबंधः तत्का
मोधिकारीत्यनुबंधचतुष्टयमर्थादुक्तं भवति किंच यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मन इत्यादिश्रु
त्या गुरुनमस्कारस्यापि शास्त्रांगत्वप्रतिपादनान्नमस्कारोपि पृथक्त्वेन कार्य इति तन्नमति हर्षकमभिधेयं ग्रंथं प्रतिजानीते अर्थतोप्यद्वयानं
दानतीतद्वैतभानतः गुरूनाराध्य वेदांतसारं वक्ष्ये यथामति २ अपिशब्देन न केवलं शब्दतः डित्थकपित्थादिवत्संज्ञामात्रं व्यवस्थितं अपितु
अर्थतः शब्दतश्चेति अद्वयानंदान् गुरूनाराध्य वेदांतसारं यथामति वक्ष्ये इत्यन्वयः अद्वयश्चासावानंद अद्वयानंदः तानद्वयानंदान् त
सैत त्र हेतुमाह अतीतद्वैतभानत इति अतीतं गतं द्वैतभानं यतस्मात् ते अतीतद्वैतभानतः निरस्तसमस्तभेदज्ञानत्वादिति भावः तान् गुरूनारा
ध्य कायवाङ्मनोभिर्नमस्कारगोचरीकृत्य वेदांतसारं वेदांतानामुपनिषद्वाक्यजातानां मध्ये यत्सारं सिद्धांतरहस्यं यस्मिन् ज्ञाते पुनर्ज्ञा
तव्यं नावशिष्यते तं वेदांतसारं यथामति बुद्धिमनतिक्रम्य वक्ष्ये प्रतिपादयिष्ये इत्यर्थः इदानीं सर्वस्यापि वस्तुविचारस्योद्देशपूर्वकत्वात्प्रति २
ज्ञातं वेदांतं नामतो निर्दिशति वेदांतो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च उपनिषद एव प्रमाणं उपनिषत्प्रमाणं उ
पनिषदो यत्र प्रमाणमिति वा तदुपकारीणि वेदांतवाक्यसंग्रहकाणि शारीरकसूत्रादीनि अथातो ब्रह्मजिज्ञासेत्यादीनि आदिशब्देन सूत्राणि
भगवद्गीताध्यात्मशास्त्राणि गृह्यंते तेषामप्युपनिषद्वाक्यत्वादिति भावः ननु [illegible]
[illegible] अनुबंधचतुष्टयस्यानिरूपितत्वादत्र प्रेक्षावतां प्रवृत्तिर्न स्यादित्यत आह अस्य वेदांतप्रकरणत्वात्तदीयैरेवानुबंधैस्तद्व
त्तासिद्धेर्न ते पृथगालोचनीयाः अस्य वेदांतसारस्येत्यर्थः ननु वेदांतशास्त्रस्यापि किमनुबंधचतुष्टयं येनास्यापि तद्वत्तासिद्धिरित्याशं
स्या क्य मूलशास्त्रस्यानुबंधचतुष्टयमाविष्करोति तत्रानुबंधो नाम अधिकारिविषयसंबंधप्रयोजनानि यथोद्देशमधिकारिणं लक्षयति अधिका
री तु विधिवदधीतवेदवेदांगत्वेनापाततोधिगताखिलवेदार्थोस्मिन् जन्मनि जन्मांतरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्राय नि
नि श्चित्तोपासनानुष्ठानेन निर्गताखिलकल्मषतया नितांतनिर्मलस्वांतः साधनचतुष्टयसंपन्नः प्रमाताधिकारी स्वाध्यायोऽध्येतव्य इति व
(शि)क्षा घ्राणं तु वेदस्य हस्तौ कल्पोथ पठ्यते ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते छंदः पादौ वेदस्य मुखं व्याकरणं स्मृतं) वनालैवर्णिकाना

मुपनीतानामध्ययनं नियमेन विधीयते अध्ययनविधिप्रयुक्तमेवाध्ययनं नाध्यापनविधिप्रयुक्तं तथा च अधीतो वेदो वेदांगानि च शिक्षा
त सभावस्तत्वै कल्पव्याकरणछंदोज्योतिर्निरुक्ताख्यानि येन तेनापाततोऽधिगताखिलवेदार्थः अत्र सर्ववेदार्थरहस्ये ज्ञाते सति उत्तरग्रंथवैयर्थ्यमिति हृ
२ रायमापातत इत्युक्तं ननु अनधीतवेदानामपि विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनादध्ययनं त[illegible]त्प्रयुक्तकर्मानुष्ठानं च वैयर्थ्यमित्याशंक्यो य
2 य त्तरमाह जन्मजन्मांतर इति तेषामाधुनिकाध्ययनाद्यभावेपि जन्मांतरीयाध्ययनादिना चित्तपरिपाकवतामस्मिन्जन्मनि विनाप्यध्ययनादिना(
ज्ञानोत्पत्तौ बाधकाभावान्नाध्ययनादिवैयर्थ्यमिति भावः काम्येति काम्यस्यापि कर्मणो धर्मसाधनत्वेपि यातायातसंपादकत्वेन बंधकत्वाद्वर्जनपुरःस
रमित्युक्तं तथा च नित्यादिकर्मानुष्ठानेन निर्गतनिखिलकल्मषतया निरस्तसकलकल्मषत्वेन अत्र निखिलपदं काम्यनिषिद्ध [illegible] जनितसुकृत
दुःकृतपरं तेन नितांतनिर्मलस्वांतः नितांतमत्यंतं निर्मलं स्वच्छं स्वांतमंतःकरणं यस्य सः तथोक्तः वक्ष्यमाणसाधनचतुष्टयसंपन्नः प्रमाता अंतः
करणप्रतिबिंबितचैतन्यमित्यर्थः एत[illegible]देव स्पष्टं करोति काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मण
हननादीनि नित्यान्यकरणे प्रत्यवायसाधनानि संध्यावंदनादीनि नैमित्तिकानि पुत्रजन्माद्यनुबंधीनि जातेष्ट्यादीनि प्रायश्चित्तानि पापक्षयसाधना
नि चांद्रायणादीनि उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शांडिल्यविद्यादीनि एतेषां [illegible] नित्यादीनां बुद्धिशुद्धिः परं प्रयोज
नं उपासनानां तु चित्तैकाग्र्यं तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतेः तपसा कल्मषं हंति विद्यया
मृतमश्नुते इति स्मृतेश्च नित्यनैमित्तिकप्रायश्चित्तोपासनानां तु [illegible] अवांतरफलं पितृलोक
सत्यलोकप्राप्तिः कर्मणा पितृलोको विद्यया देवलोक इत्यादिश्रुतेश्च साधनानि तु नित्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरागशमदमादिषट्कसं
पन्मुमुक्षुत्वानि नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनं ऐहिकानां स्रक्चंदनवनितादिविषयभोगानां
कर्मजन्यतयाऽनित्यत्वात् आमुष्मिकाणाममृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः शमादयस्तु
शमदमोपरतितितिक्षासमाधानश्रद्धाख्याः शमस्तावत् श्रवणादिविषयभोगेभ्यो मनसो निग्रहः यथा तीव्रायां बुभुक्षायां भोजनादन्यो व्यापारो २
मनसो न रोचते भोजने तु विलंबं न सहते तथा स्रक्चंदनादिविषयेष्वश्रांतमरुचिः तत्त्वज्ञानसाधनेषु श्रवणमननादिषु संततमरुचिर्नीयते भि
तदा सर्ववासनावतापि श्रवणादिसाधनेभ्यः सकाशादुद्वीयस्य स्रक्चंदनादिविषयेषु गम्यमानं मनो ये[illegible]नांतःकरणवृत्तिविशेषेण निगृह्यते स द

निग्रहीतानामेव तेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छन्ति तथा तेषां २

न्तिविशेषः शम इत्यर्थः इदानीं दमलक्षणमाह दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं ज्ञानसाधनश्रवणादिसाधनेभ्योऽन्यत्र लोकेषु शब्दादिविषयेषु
प्रवर्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्त्यन्ते स दम इत्यर्थः इदानीमुपरतेर्लक्षणमाह निवर्तितानां तेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणमुप
रतिः नि ग्रहो येन वृत्तिविशेषेण क्रियते सोपरतिरित्यर्थः उपरतेर्लक्षणान्तरमाह अथवा विहितानां कर्मणां विधिना परित्यागः विहितानां नित्यादिकर्मणां विधिना
कर्म चतुर्थाश्रमस्वीकारेण परित्यागः नाहं कर्ता सर्वस्थानमुपरतिरित्यर्थः तितिक्षायाः लक्षणमाह तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता शरीरधर्मस्पर्शी शीतोष्णादेस्तज्ज
न्यसुखदुःखादिभिः शरीरेणानुभूयमानस्य त्वात्मप्रकाशचिद्रूपस्यात्मनि शीतोष्णादेरसत्ताभावादिति विवेकदीपेन मिथ्याभानस्य शीतोष्णादेर्द्वन्द्वस्य सहनं सा
तितिक्षेत्यर्थः इदानीं समाधानलक्षणमाह निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानं शब्दादिविषयेभ्यो निगृहीतस्यान्तःकरणस्य
श्रवणादौ तदनुगुणेषु तदुपकारकेषु अमानित्वादिसाधनविषयेषु समाधिर्नैरन्तर्येण तच्चिन्तनं समाधानमित्यर्थः श्रद्धादयः स्पष्टार्थाः गुरुवेदान्तवाक्येषु वि
श्वासः श्रद्धा मुमुक्षुत्वं मोक्षेच्छा एवंभूतः प्रमाताधिकारी तथा च पूर्वोक्तसकलविशेषणविशिष्टप्रमाताधिकारीत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति शान्तो
दान्त इत्यादिश्रुतेः उक्तं च प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे यथोद्दे
शं विषयं निरूपयति विषयो जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयं तत्रैव वेदान्तानां तात्पर्यात् अविद्याऽध्यारोपितसर्वज्ञत्वकिंचिज्ज्ञत्वादिविरुद्धधर्मपरित्या
गेनाऽवशिष्टं शुद्धचैतन्यं ज्ञेयस्वरूपमिव सर्वेषां वेदान्तवाक्यानां विषय इत्यर्थः क्रमप्राप्तं संबन्धं लक्षयति संबन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनि बोध्य
षत्प्रमाणस्य च बोध्यबोधकभावलक्षणः बोध्यबोधकभावः इति बोध्यस्य ब्रह्मात्मैक्यरूपस्य बोधकस्य वेदान्तशास्त्रस्य च बोधकभाव एव संबन्ध इत्यर्थः
अवशिष्टं प्रयोजनमाह प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च ब्रह्मात्मैकत्वलक्षणचिन्मात्रगताऽज्ञानतत्कार्यसकलप्रपं
चनिवृत्तिः पुनरुक्तस्य भावरूपस्य स्वस्वरूपाखण्डानन्दप्राप्तिः फलमित्यर्थः ननु लोके प्राप्तस्य क्रियासाध्यस्य स्वर्गादेः पुरुषार्थत्वेन फलत्वं दृष्टं अत्र तु नि वा
त्यप्राप्तस्यात्मस्वरूपस्य क्रियासाध्यत्वाभावेन पुरुषार्थत्वाभावात्कथं फलत्वमिति चेन्न अप्राप्तस्येव पुरुषार्थत्वनियमाभावात् यथा लोके कस्यचिद्विस्मृतकं
ठमणेः स्वयुक्तशोकाग्निसंदह्यमानस्याप्तोपदेशोत्तरकालं स्वकंठगचामीकरप्राप्तेरपि पुरुषार्थत्वात्फलत्वं दृष्टमेवमत्रापि नित्यप्राप्तस्यात्मनः अज्ञानमो वै
हान्धकारावृतत्वेन विस्मृतस्वस्वरूपस्य पुरुषस्य गुरुश्रुति वाक्यश्रवणानन्तरमज्ञानमोहान्धकारे निरस्ते सत्यात्मस्वयंप्रकाशमानचिद्रूपस्याप्ति
रस्येवात्मनः फलत्वमुपपद्यत इति भावः उक्तेऽर्थे श्रुतिं प्रमाणयति तरति शोकमात्मवित् ब्रह्मविद्ब्रह्मैव भवति इत्यादिश्रुतेः अधुनाऽशा
स्त्रारम्भनिमित्ताधिकार्यादिनिरूपणानन्तरं शास्त्रारंभं प्रस्तौति अथवा लक्षितस्याधिकारिणः कर्तव्यं दर्शयति अयमधिकारी जन्ममरण

तात्कथमुपदिशतीत्यत आह अध्यारोपेति अखंडब्रह्मस्वरूपस्य विधिमुखेनोपदेष्टुमशक्यं विद्यारोपितमिथ्यानानापदार्थप्रपंचादमुखेनोपलक्षितमखंडचैतन्य
मेव पुनः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिमनुसरत्

दिसंसारानलसंतप्तोप्रदीप्तशिरा [..] जलराशिमिवोपहारः पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसत्य तमनुसरति उक्तलक्षणलक्षितो बु
२ द्धिमान्निहितोधिकारी गुरुमनुसरतीत्यन्वयः ननु संसारासक्तस्य च तस्य विषयतो त्तुपस्यात्तिरहितस्य गुरूपसर्पणमयुक्तमित्याशंक्याह संसारान
लसंतप्त इति संतापे हेतुमाह जन्मेति आदिशब्देन व्याध्यादयो गृह्यंते संतप्तस्यैव गुरूपसरणमित्यत्र दृष्टांतमाह प्रदीप्तशिरा इति अर्धदग्धमस्त
कोदाहात्निवृत्तिकामो यथा शीतलं जलराशिमनुसरति तथा संसारतापत्रयदह्यमानस्तन्निवृत्तिकामः स्वस्वरूपाज्ञितामुः संसारनिवर्तकं श्रोत्रियं
ब्रह्मनिष्ठं करतलामलकवत्स्वप्रकाशात्मस्वरूपसमर्पकं गुरुं समीपं गत्वानुसरति मनोवाक्कायकर्मभिः सेवत इत्यर्थः अस्मिन्नर्थे श्रुतिमुदाहरति स
स्व मित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः अथ गुरुकृत्यमाह स परमकृपयाध्यारोपापवादन्यायेनैनमुपदिशति स पूर्वोक्तो गुरुरेनं शिष्यमुपदि
शतीत्यन्वयः ननु परमरहस्यमपि ब्रह्मस्वरूपं कस्मादुपदिशतीत्यत आह कृपयेति कृपाव्यतिरेकेण साधनांतराभावादित्यर्थः नन्वखंड
स्य ब्रह्मस्वरूपस्यागोचरत्वेनोपदे[..]ष्टुमशक्यत्वेपि नेह नानास्ति किंचनेत्यादिश्रुतिमनुसृत्य लक्षणया विधिमुखेनापि उपदिशतीति भावः
तत्र श्रुतिमाह तस्मै स विद्वानुपसन्नाय प्राहेत्यादिश्रुतेः अस्मिन्नर्थे लोकिकदृष्टांतमाह असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यऽवस्त्वारोपोऽध्या
रोपः यावहारिकवस्तुत्वेनाभिमते रज्जौ अवस्तुभूतसर्पारोपो नाम रज्ज्ववच्छिन्नचैतन्यनिष्ठाविद्योपादानत्वेन नायं सर्पः किंतु रज्जुरिति विशेषदर्श
नोत्तरकालीनाधिष्ठानरज्जुसाक्षात्कारेण रज्ज्वज्ञाननिवृत्तौ सर्पभ्रांतिर्निवर्तत इत्यर्थः उक्तमर्थं दार्ष्टा[..]न्तिके योजयति वस्तु सच्चिदानंदाद्वय
ब्रह्म कालत्रयानपायि आत्मैव वस्तुशब्दार्थः तत्र वस्तुस्वरूपमाह अज्ञानादिसकलजडसमूहोऽवस्तु अज्ञानतज्जन्यमोमादेर्मिथ्यात्वाद्प्रप
त्वाद्यावयवत्वादिकारित्वात्साविद्यासिद्धिकत्वादित्यादिहेतुभिरवस्तुत्वमित्यर्थः एतदेव विस्तरेण प्रतिपादयितुमज्ञानस्वरूपं तावदाह अज्ञानं तु
सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किंचिदिति वदंति किमिदमज्ञानं सद्रूपमसद्रूपं वा नाद्यः तस्य प्रमाणविषयत्वातुल्य
त्वेनतुच्छत्वात् नापि द्वितीयः असतः कारणत्वानुपपत्तेरित्यादिहेतुभिः सत्त्वेनासत्त्वेन वा निरूपयितुं न शक्यत इत्याह अनिर्वचनीयमिति नन्वज्ञान
स्यानिर्वचनीयत्वेन सर्वथा ज्ञातुमशक्यत्वात्तदभावप्रसंगमाशंक्याह त्रिगुणात्मकमिति अजामेकामित्यादिश्रुतिभिः सत्त्वरजस्तमोगुणात्मकत्वप्रतिपाद २
नादित्यर्थः नन्वेवमजस्याज्ञानस्य श्रुतिप्रसिद्धस्य व्योमादिरूपेणावस्थानस्य सत्यवद्भासमानत्वेन संसारानिवृत्तिरित्याशंक्याह ज्ञानविरोधीति एतादृशमप्य
ज्ञानमात्मसाक्षात्कारेण निवर्तत इत्यर्थः तदुक्तं भगवता दैवी ह्येषा गुणमयी मम मा[..]या दुरत्यया मामेव ये प्रपद्यंते मायामेतां तरंति ते ज्ञानाभा
व एवाज्ञानमिति तार्किकमतं निराकरोति भावरूपमिति त्रिगुणात्मकभावरूपत्वेपि इ[..]दमित्थमेवेति पिंडीकृत्य प्रदर्शयितुं न शक्यत इत्याह यत्किं
चिदिति किमप्यघटनघटनापटीयः [..] इत्यर्थः अनिर्वचनीयानादिभावरूपाज्ञानसद्भावेनुभवमेवोदाहरति अहमज्ञ इत्यनुभवात् अह
मेस मज्ञो मामहं न जानामीत्यपरोक्षावभास एव प्रमाणमित्यर्थः नवो वोप ंभकत्वेनाप्यनुमियादेव देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेः अज्ञा

स्याविद्यासर्पज्ञाना
नामाकारेण परिण
ममानां सर्पाकारे
ण विवर्तते सवि
वर्तोपि रज्ज्ववच्छिन्न
चैतन्य २०

नं विभज्यते इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते वस्तुतोऽज्ञानस्यैकत्वेपि समष्ट्यभिप्रायेणैकमिति व्यवह्रियते व्य
ष्ट्यभिप्रायेणानेकमित्यर्थः एतदेव प्रपंचयितुं प्रतिजानीते तथाहि यथा वृक्षाणां समष्ट्यभिप्रायेण वनमित्येकत्वव्यपदेशः यथा वा जलानां समष्ट्य
भिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगताज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः यथा वहूनां वृक्षाणां समुदाय
विवक्षया वनमित्येकत्वव्यपदेशः यथा बहुनद्यादिजलानां समुदायविवक्षया जलाशय इत्येकत्वव्यपदेशः तथांतःकरणोपाधिभेदेन नानात्वेन प्र
तीयमानानां जीवगताज्ञानानां समुदायविवक्षयाऽज्ञानमित्येकत्वव्यपदेश इत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति अजामेकामित्यादिश्रुतेः नाना
गत जीव यच्छुपाध्यपेक्षया समष्ट्युपाधेरस्य वैलक्षण्यं दर्शयति इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना विगतरागादिदो
षसकलकार्यप्रपंच कारणभूतस्याज्ञानस्य समष्टिभूतोत्कृष्टोपाधित्वेन विशुद्धसत्वप्राधान्यमिति भावः एतत्समष्ट्युपाधिद्वारेणे
श्वरचैतन्यं लक्षयति एतदुपहितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियंतृत्वादिगुणकमव्यक्तमंतर्यामी जगत्कारणमीश्वर इति व्यपदिश्यते
एतत्समष्ट्यज्ञानोपलक्षितं चैतन्यं सर्वस्य चराचरात्मकप्रपंचस्य साक्षित्वेन सर्वज्ञ इत्युच्यते सर्वेषां जीवानां कर्मानुरूप फलदातृत्वेने
श्वर इत्युच्यते तथा सर्वेषां जीवानामंतःहृदये स्थित्वा बुद्धिनियामकत्वेनांतर्यामीत्युच्यते सर्वस्य चराचरात्मकप्रपंचस्य विवर्ताधिष्ठानत्वे प्रमाणागोचरत्वादव्यक्तमित्युच्यते =
न जगत्कारणत्वमिति व्यपदिश्यत इत्यर्थः उक्तेर्थे युक्तिमाह सकलाज्ञानावभासकत्वात् अत्र प्रमाणमाह यः सर्वज्ञः सर्वविदिति श्रुतेः इदा
नीं तस्यैवेश्वरस्य समुदायोपाधिरेव कारणशरीरत्वमानंदमयकोशत्वं सुषुप्त्यवस्थावैशिष्ट्यं च लभत इत्याह ईश्वरस्येयं समष्टिरखिलकारणत्वात्कारणशरीर
मानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयः कोशः कारणशरीरत्वे हेतुमाह अखिलेति आनंदमयत्वे हेतुमाह आनंदप्रचुरत्वादिति कारणत्वावस्थायां
दा प्रकृतिपुरुषमात्रव्यतिरिक्तस्य सकलकार्यप्रपंचस्याभावादानंदबाहुल्यमिति कोशत्वे युक्तिमाह आच्छादकत्वादिति शरीराच्छादकचर्मवदात्माच्छादकत्वा
दज्ञानस्य कोश इति व्यवहारः ननु तथापि कारणत्वोपाधेरज्ञानस्य सुषुप्तित्वं कुत इत्यत आह सर्वोपरमत्वात्सुषुप्तिः सर्वस्य स्थूलसूक्ष्मोपाधेः
कारणोपाधौ लीनत्वात्सुषुप्तित्वमित्यर्थः ननु स्थूलसूक्ष्मप्रपंचलयस्थानस्य कथं सुषुप्तित्वमित्याशंक्य संज्ञाभेद इत्याह अत एव स्थूलसूक्ष्मप्रपंचलयस्था
नमिति चोच्यते यतः कारणस्य सुषुप्तित्वं अत एव पंचीकृतभूतकार्यस्थूलप्रपंचस्य जाग्रदवस्थाविशिष्टस्यापंचीकृतभूतकार्यस्य सूक्ष्म प्रपंचस्य ल स्वप्नप्रपंचविशिष्टस्य
सै यस्थानमित्यपि व्यवह्रियते इत्यर्थः समष्टिरूपाज्ञानं प्रपंच्येदानीं व्यष्टिभूतमज्ञानं निरूपयितुं दृष्टांतं तावद्दर्शयति यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इ
त्यनेकत्वव्यपदेशः यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथाज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः यथा वहुवृक्षसमुदायस्य वनत्वेन

वस्तुत एकत्वेन तदवभासकेश्वरजीवचैतन्ययोरप्येकत्वमित्यर्थः सौषुप्तिजीवचैतन्यस्य ८

रूपेनैकत्वव्यवहारेपि प्रत्येकं वृक्षविवक्षया चूतास्योवरवो वृक्षाः सन्तीति बहुत्वव्यवहारः यथा वापीकूपतडागादिषु समुदाया विवक्षया जलाशय इत्येक
त्वव्यवहारेपि प्रत्येकं वाप्यादिविवक्षया बहूनि जलानि तिष्ठंतीति बहुत्वव्यवहारः तथा सकलप्रपंच कारणस्याज्ञानस्य समुदायरूपेणैकत्वेपि अहंकारादि
कारणीभूतानां जीवगताज्ञानानां प्रत्येकं विवक्षया बहुत्वव्यवहार इत्यर्थः अस्मिन्नर्थे श्रुतिं प्रमाणयति इंद्रो मायाभिः पुरुरूप ईयत इत्यादिश्रुतेः ननु तथाप्ये
४ कस्यैवाज्ञानस्य तदवच्छिन्नचैतन्यस्य वा व्यष्टिसमष्टिता कुत इत्यत आह अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः भेदविवक्षया व्यष्टित्वं मह
५ घटादिवत् अभेदविवक्षया च समष्टित्वं मृत्पिंडवत् इत्यर्थः तत्र महाप्रलयकालीनसमष्ट्युपाधिभूतविशुद्धसत्वप्रधानाया मूलप्रकृतेः सकाशादैनंदिन
प्रलयकालीनव्यष्ट्युपाधिभूतजीवप्रकृतेर्भेदं दर्शयति इयं व्यष्टिर्निकृष्टोपाधित्वेन मलिनसत्वप्रधाना जीवगता सुषुप्त्यवस्थायाऽपन्नाहंकारादिविक्षे इयं
नि पसंस्कारादिरूपा कृष्टोपाधित्वेन मलिनसत्वप्रधानेत्यर्थः अनेनोपाधिना प्राज्ञचैतन्यं लक्षयति एतदुपहितं चैतन्यमल्पज्ञानीश्वरत्वादिगुणकं प्राज्ञ इत्यु
च्यते अत्रोपपत्तिमाह एकाज्ञानावभासकत्वात् ईश्वरगतमूलाज्ञानस्य जीवगताहंकारादिविक्षेपसंस्कारादिरूपाज्ञानस्य प्राज्ञत्वं दर्शयति अस्य प्रा अत एव
कारादि ना ज्ञत्वमस्य ष्टोपाधितयातिप्रकाशकत्वात् अस्यापीयमहंकारकारणत्वात्कारणशरीरमानंदप्रचुरत्वात् कोशवदाच्छादकत्वाद्वहेतोरानंदमयः को व्याप्ति
शः संस्काररूपस्य निकृष्टोपाधितया तदावृतत्वे नातिप्रकाशकत्वाभावाद्युक्तमस्येत्यर्थः यथा जगत्कारणेश्वरोपाधेः कारणशरीरत्वं आनंदप्र त्वं
चुरत्वेन चानंदमय त्वं कोशवदाच्छादकत्वेन च कोशत्वं तथैतस्यैवेतारतम्येन प्राज्ञचैतन्ये व्यातिदिशति अहंकारादीनि प्रलयकाले हिरण्यगर्भादिप्रपं
चोत्पादकेश्वरप्रकृतिवत्सुषुप्तिकालेहंकारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इंद्रियतद्विषयाभावेन व्याप्तसंगा
भावानंदबाहुल्यादाच्छादकत्वादानंदमयत्वं कोशत्वं च युक्तमिति भावः ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिपदवा च्यत्वमित्याशंक्य
पूर्ववत्संज्ञाभेदेन वस्तुभेद इति वक्तुं तत्र युक्तिमाह सर्वोपरमत्वात्सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते पंचीकृतस्थूलशरी
रस्य व्यावहारिकस्या पंचीकृतसूक्ष्मशरीरे प्रातिभासिके प्रविलापितत्वात्तस्यापि प्रातिभासिकस्य स्वप्नप्रपंच स्य स्वकारणेऽज्ञाने लीनत्वात्स
र्वोपरतिरित्यर्थः तथा चोक्तं लये फेनस्य तद्धर्मा द्रवाद्याः स्युस्तरंगके तस्यापि विलयो नीरे तिष्ठंत्येते यथा पुरा व्यावहारिकदेहस्य लयः स्यात्प्रतिभा
सके तल्लये सच्चिदानंदाः पर्यवस्यंति साक्षिणीति ननु प्रलयकाले सुषुप्तिकाले चांतःकरणतद्वृत्त्यभावेनानंदग्राहकाभावानंदप्राचुर्यसद्भावे ४
प्रमाणाभावमाशंक्य परिहरति तदानीमेतावीश्वरप्राज्ञौ चैतन्यप्रदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनुभवतः यथा स्वच्छत्वेनांतःकरणस्य
वृत्तिरंगीक्रियते तथा चैतन्यप्रदीप्ताज्ञानस्यापि सूक्ष्मा वृत्तयः स्वीक्रियंते तथा चेश्वरः स्वकीयाज्ञानवृत्तिभिः स्वा त्मानंदबाहुल्यं तारतम्येनानुभव
तीति जीवोपि संस्कारमात्रावशिष्टा ज्ञानवृत्तिभिः स्वात्मानंदबाहुल्यं तारतम्येनानुभवतीति भावः अत्रैवोपष्टंभकत्वेन श्रुतिमवतारयति

आनंदभुक् चेतोमुखः प्राज्ञ इति श्रुतेः अस्यार्थः आनंदो विक्षेपाभावोपलक्षित आत्मा तमेव भुंक्ते ऽज्ञानवृत्तिभिरनुभवतीत्यानंदभुक् चेत आत्मस्व
रूपावबोधः स एवावरणशक्तिसहितो मुखं यस्य स चेतोमुखः प्राज्ञः प्रकृष्टे स्वयंप्रकाश आनंद आत्मनि साज्ञानज्ञप्तिरज्ञानवृत्तिरूपो बोधो यस्य स प्रा
ज्ञः उक्तावस्थाद्वयाभावेनावगम्यत्वात् तृतीयः उत्तरकालीनसुखपरामर्शा पत्तिरपि सर्वानुभूतसुखबाहुल्य सद्भावे प्रमाणमित्याह सुखमहम
स्वाप्सं न किंचिदवेदिषमिति सुप्तोत्थितस्य परामर्शोपपत्तेश्च सुखमस्वाप्समित्यानंदपरामर्शः न किंचिदवेदिषमित्यज्ञानपरामर्शः तथा च सुषु
प्तिदशायां प्रलयकाले च प्राज्ञेश्वरावज्ञानवृत्तिभिरानंदमनुभवत एवेत्यर्थः इदानीमीश्वरगतमूलाज्ञानस्य जीवगतसंस्कारमात्रावशिष्टाज्ञानस्य
च समष्टिव्यष्ट्यभिप्रायेणाभेदभावेपि वस्तुभेदो नास्तीत्येतत्सदृष्टांतमाह अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिवाभेदः उक्तो
पाधिद्वयद्वारेणेश्वरप्राज्ञयोरप्यभेदं दृष्टांतमुखेन दर्शयति एतदुपहितयोरीश्वरप्राज्ञयोरपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलग
तप्रतिबिंबाकाशयोरिवाभेदः ईश्वरस्य वनावच्छिन्नाकाशवत्प्राज्ञस्य वृक्षावच्छिन्नाकाशवच्च तथा स्थूलजलाशयोपाध्यवच्छिन्नाकाशवत्तद्गत
प्रतिबिंबाकाशवच्च कारणोपाध्यवच्छिन्नेश्वरस्य कार्योपाध्यवच्छिन्नप्राज्ञस्य च वस्तुतोऽभेद एवेत्यर्थः तत्र प्रमाणमाह एष सर्वेश्वर इति श्रु
तेः तथा चोक्तमाचार्यैः कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते इति उपाधिद्वयावच्छिन्नौ प्राज्ञे
श्वरौ सप्रपंचं निरूप्येदानीमनवच्छिन्नं तुरीयं यच्चैतन्यं तन्निरूपयति वनवृक्षतदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबाकाशयोर्वा आधारभूता
नुपहिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत् तुरीयमित्युच्यते यथा स्थूलवनो पाध्यवच्छिन्ना
काशापेक्षया सूक्ष्मवृक्षोपाध्यवच्छिन्नाकाशापेक्षया च महाकाशस्य तदुभयाधारतयाऽनवच्छिन्नत्वात्तुरीयत्वं तथा कार्यकारणोपाधितद
वच्छिन्नचैतन्यद्वयापेक्षया तदाधारभूतं यदनवच्छिन्नं सर्वव्यापि चैतन्यं विशुद्धं तत्तुरीयमित्युच्यत इत्यर्थः अस्मिन्नर्थे श्रुतिं संवादयति शिवमद्वै
तं चतुर्थं मन्यंते इत्यादिश्रुतेः एतदेव विशुद्धं चैतन्यं सर्वोक्तचैतन्यद्वयेन सहैकत्वविवक्षायां महावाक्यस्य वाच्यत्वं लभते भेदविवक्षायां च लक्ष्यत्वं लभ
त इत्याह इदमेव तत्त्वं तुरीयं शुद्धचैतन्यमज्ञानादितदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्यमिति चोच्य व
ते त्रयाणां चैतन्यानां चैतन्येन रूपेणैकत्वेप्यवच्छिन्नानवच्छिन्नत्वेन रूपेण वाच्यलक्ष्यत्वसंभवादिति भावः अथेदानीं स्वप्रकाशचिद्रूपस्यात्मनः क
थं कुंठितप्रकाशत्वं कथं वासंगोदासीनस्यात्मनः आकाशादिप्रपंचजनकत्वमित्येतन्महाविरोधपरिहारायाज्ञानस्य शक्तिद्वयं निरूपयते अस्या
ज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं तदेव नामतो निर्दिशति आवरणशक्तिस्तावत् सच्चिदानंदस्वरूपमावृणोतीत्यावरणशक्तिः बु

वेदु १

लादिस्थावरांतं जगज्जालं [..]वत् नामरूपात्मकं विविधं प्रतिसृजतीति विक्षेपशक्तिरिति शक्तिद्वयमज्ञानस्येत्यर्थः ननु परिछिन्नस्य स्व

प्रकाशचिद्रूपाखंडपरिपूर्णस्वरूपात्मनः परिछिन्नेनाल्पेन जडतमोरूपेण व्यापिकेनाज्ञानशक्तिविशेषेण कथमावरणमित्याशंक्य वस्तु

५ तोऽज्ञानस्यात्माछादकत्वाभावेऽपि प्रमातृबुद्धिमात्राछादकत्वेनाज्ञानस्यात्माछादकत्वमुपचारादुच्यत इत्याह आवरणशक्तिस्तावद

5 ल्पोपि मेघोऽनेकयोजनायतमादित्यमंडलमवलोकयितृनयनपथपिधायकतया यथाछादयतीव तथाज्ञानं परिछिन्नमप्यात्मानम

परिछिन्नमसंसारिणमवलोकयितृबुद्धि[..]पिधायकतया छादयतीति तादृशं सामर्थ्यं यथा ल्पोपि मेघोऽनेकयोजनविस्तीर्णमादित्य

मवलोकयितृपुरुषदृष्टिमात्राछाद[..]कत्वेन छादयतीव तथाज्ञानं परिछिन्नमप्यपरिछिन्नमात्मानमवलोकयितृबुद्धिछादकत्वेनात्मा

नमाछादयतीत्युपचारादुच्यत इत्यर्थः अस्मिन्नर्थे वृद्धसंमतमाह यदुक्तं घनछन्नदृष्टिर्घनछन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः

तथा बद्धवद्भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोऽहमात्मा अनयैवावरणशक्त्याऽऽवृतस्यात्मनः कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वादिसं

के सारभावना अपि भवंति इयमेवावरणशक्तिरात्मभेदबुद्धिजनकत्वेन संसारहेतुरिति भावः अत्रानुरूपं दृष्टांतमाह यथा स्वाज्ञानेनावृता

यां रज्जौ सर्पत्वभावना असंगोदासीनस्यात्मनः कथं जगत्कारणत्वमिति तन्निराकर्तुं विक्षेपशक्तिस्वरूपमाह विक्षेपशक्तिस्तु

यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमज्ञानमपि स्वावृतात्मनि विक्षेपशक्त्याकाशादिप्रपंचमुद्भावयति

तादृशं सामर्थ्यं यथा रज्जुविषयकमज्ञानं सर्पमुद्भावयति तथात्मविषयमज्ञानमपि स्वावच्छिन्नआत्मनि विक्षेपशक्तिभावेनाकाशादिप्रपंचमु

त्पादयतीत्यर्थः अस्मिन्नर्थे ग्रंथांतरसंमतिं दर्शयति यदुक्तं विक्षेपशक्तिर्लिंगादिब्रह्मांडांतं जगत्सृजेदिति ननु किमात्मा चराचरात्मकप्रपंचस्य

निमित्तमुपादानकारणं वा नाद्यः दंडादिवत्स्वकार्यव्यापित्वं न स्यादात्मनः तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुत्या स्वकार्यव्यापित्वश्रवणात् नाद्वि

तीयः अचेतनस्य जडस्य प्रपंचस्य चेतनोपादानकत्वासंभवात् उपादानत्वे न च कार्यकारणयोरभेदेन प्रपंचस्यापि चैतन्यरूपत्वप्रसंगादनित्य

त्वं न स्यादित्याशंक्य जडप्रपंचं प्रत्यात्मनश्चैतन्यप्राधान्येन निमित्तत्वं स्वाज्ञानप्राधान्येनोपादानत्वं च संभवत्याह शक्तिद्वयवदज्ञानोपहितं

प्राधान्य चैतन्यं स्वप्रधान[..]तया निमित्तं स्वोपाधितयोपादानं च भवतीति यथायस्कांतसन्निधाने जडमयं लोहं चेष्टते तथा चैतन्यसन्निधाने जड

मज्ञानं चेष्टत इत्य[..]ज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वं जडाकाशादिकार्यं प्रति मायायाः साक्षादुपादानत्वेन मायाविन ईश्वरस्यापि परंपर

योपचारादुपादानत्वं न विरुध्यत इत्यर्थः यदुक्तं चैतन्यस्य निमित्तकारणत्वे कार्यानुप्रवेशो न स्यात्तन्न कारणस्य कार्यानुप्रवेशनियमस्या

यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानस्य रज्जुस्वरूपापरित्यागेन स्वरूपांतरप्रदर्शकत्वं । तथेश्वरचैतन्यनिष्ठाज्ञानशक्तेरपि चैतन्यस्वरूपापरित्यागेनाकाशादिरूपांतराकारेण प्रदर्शकत्वम् ३

पादानकारणविषयत्वेन निमित्तकारणविषयत्वाभावात् तस्माद्वा इत्यादिश्रुतेरप्युपादानकारणपरत्वात् यदप्युक्तं आत्मन उपादानत्वेन कारणत्वे प्रपंचस्यानित्यत्वं न स्यादिति तदपि न तस्य परिणामविषयत्वेन विवर्त्तविषयत्वाभावात् प्रपंचस्य ब्रह्मविवर्त्तत्वात् विवर्त्तत्वं च स्वस्वरूपापरित्यागेन रूपांतरप्रदर्शकत्वं एतावताकाशादिप्रपंचस्यापि मिथ्यात्वं न चैवमज्ञानस्य मिथ्यात्वे तत्प्रयुक्तबंधमोक्षयोरपि मिथ्यात्वप्रसंग इति वाच्यं इष्टापत्तेः तदुक्तं भागवते बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनं अलमतिविस्तरेण एकस्यैवात्मनो निमित्तोपादानकारणत्वे दृष्टांतमाह यथा लूतातंतुस्वकार्यं प्रति स्वप्राधान्यतया निमित्तं स्वशरीरप्रधानतयोपादानं भवति यथा लूता तंतुः स्वोत्पाद्यमानलूताकार्यं प्रति स्वचैतन्यप्रधानतया निमित्तं चैतन्यसान्निध्यव्यतिरेकेण जडस्य देहस्य तच्छरीरस्य तंतुजनकत्वाभावात् स्वशरीरप्राधान्येन चोपादानं भवति अशरीरस्य साक्षात्तंतुजनकत्वा संभवात् शरीरस्य साक्षात्तंतूपादानत्वेन तदवच्छिन्नचैतन्यस्याप्युपादानत्वं च भवतीत्यर्थः इदानीं विक्षेपक्रममाह तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशः आकाशाद्वायुर्वायोरग्निरग्नेरापोऽद्भ्यः पृथिवी चोत्पद्यते आकाशादेर्जडत्वात्तमोगुणप्रधानविक्षेपशक्तियुक्ताज्ञानावच्छिन्नचैतन्यस्यैवाकाशादिप्रपंचजनकत्वमिति भावः अस्मिन्नर्थे श्रुतिं प्रमाणयति तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः एतेनार्थात्सांख्यनैयायिकपक्षौ निरस्तौ प्रकृतेरज्ञानस्य शक्तिमत्त्वपरतंत्रत्वात् स्वतंत्रस्य केवलस्य जडस्याज्ञानस्य जगत्कारणत्वानुपपत्तेः ईक्षतेर्नाशब्दमिति न्यायनिरस्तत्वात् परमाणोरप्युक्तदोषग्रासत्रासानपायात् निमित्तोपादानप्रतिपादकश्रुतिस्मृतिन्यायविरोधाच्च यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति सदेव सोम्येदमग्र आसीत् एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते बीजं मां सर्वभूतानां मिति श्रुतिस्मृतिभिरीश्वरस्यैव जगत्कारणत्वप्रतिपादनात् नन्वाकाशादिप्रपंचोत्पादकचैतन्यावच्छेदकाज्ञाने कुतस्तमःप्राधान्यमित्याशंक्याह तेष्वाकाशादिष्वाधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य कारणगुणा हि कार्यगुणानारभंत इति न्यायादिति भावः ननु त्रिगुणात्मकत्वादज्ञानस्य कथं तमोगुणमात्रप्राधान्येनाकाशादिजनकत्वमित्याशंक्याह तदानीं सत्त्वरजस्तमांसि कारणगुणप्रक्रमेण तेष्वाकाशादिषूत्पद्यंते तदानीमुत्पत्तिवेलायां सत्त्वादयोऽपि गुणास्तारतम्येन कारणगुणप्रक्रमन्यायेन तेष्वाकाशादिषु पंचभूतेषूत्पत्तितारतम्याधिक्येन जायंत इत्यर्थः इमान्येव सूक्ष्मशरीरादिकारणभूतान्यपंचीकृतानि सूक्ष्मरूपपंचभूततन्मात्राण्युच्यंते तान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यंते तदुक्तं पंच प्राणमनोबु

Left margin: तंतुसर्जने ३ च

संभ

त्वोपचारात् एवमीश्वरस्यापि स्वचैतन्यप्राधान्यतया निमित्तत्वं स्वोपाधिप्राधान्यतयोपादानत्वं ८

Right margin: चैतन्य ५

शक्ति

अभिन्न

सर्वाह

इदानींद्रियसमन्वितं अपंचीकृतभूतोत्थं सूक्ष्मांगं भोगसाधनमिति वचनात् दपंचीकृतभूतेभ्यः [illegible] सूक्ष्मशरीराणि पंचीकृतस्थूलेभ्यः स्थूलश
रीराणि चोत्पद्यंत इत्याह एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते सूक्ष्मशरीराण्यपि सप्तदशावयवकानि लिंगशरीराणि सूक्ष्मशरीरस्
६ स्वरूपमुक्ता तदवयवानाह अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राण
6 ख्यानि सात्विकांशादाकाशाच्छ्रोत्रमुत्पद्यते सात्विकांशाद्वायोस्त्वगिंद्रियं सात्विकांशात्तेजसश्चक्षुः सात्विकांशाज्जलाज्जिह्वा सात्विकांशा
त्पृथिव्याः सकाशाद्घ्राणेंद्रियं चैतत्क्रमेणोत्पद्यंत इत्याह एतान्याकाशादीनां सात्विकांशेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते बुद्धेर्लक्षणमाह बु यस्तेभ्यः
द्धिर्नाम निश्चयात्मकांतःकरणवृत्तिः वृक्षोवाहमिति निश्चयात्म[illegible]कांतःकरणवृत्तिरेव बुद्धिरित्यर्थः मनसो लक्षणमाह मनोनाम सं
स्म कल्पविकल्पात्मकांतःकरणवृत्तिः अहं चिद्रूपो देहो वेति संशयात्मकांतःकरणवृत्तिरेव मन इत्यर्थः स्मरणात्मकचित्तस्य गर्वात्माहंकारस्य
बुद्धिमनसोरंतर्भावमित्याह अनयोरेव चित्ताहंकारयोरंतर्भावः यद्यप्यंतःकरण[illegible]त्वेन चतुर्णामेक
र त्वं तथाप्येकस्यैव पुरुषस्य पाचकः पाठक इत्यादिवृत्तिभेदाद्भेद एकस्याप्यंतःकरणस्य निश्चयसंशयस्मरणाहंकारविषयभेदेर्बुद्ध्यादिभे
द इत्यर्थः बुद्ध्यादीनामुत्पत्तिप्रकारं दर्शयति एते पुनराकाशादिगतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यंते तेषां चतुर्णां सात्विकांशेभ्यो भूतेभ्यः
उत्पत्तौ निमित्तमाह एतेषां प्रकाशात्मकत्वात्सात्विकांशकार्यत्वं बुद्ध्यादीनां प्रकाशात्मकत्वात्सात्विकांशभूतकार्यत्वं बुद्धेर्विज्ञानमय इत्यर्थः
कोशत्वं दर्शयति इयं बुद्धिर्ज्ञानेंद्रियैः सहिता सती विज्ञानमयकोशो भवति बुद्धिः सत्वकार्यत्वाज्ज्ञानेंद्रियसाहित्येन प्रकाशाधिक्याद्वि
ज्ञानमयत्वं आत्माच्छादकत्वाच्च कोशत्वमित्यर्थः चिन्मुद्बुद्धिप्रतिबिंबितचिदात्मनो जीवत्वं दर्शयति अयं कर्तृत्वभोक्तृत्वसुखित्व
दुःखित्वाद्यभिमानित्वेनेहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते तत्प्रायः पिंडवद्बुद्ध्यारोपितं चैतन्यं वस्तुतो कर्तृभोक्तृनित्या
नंदापरिच्छिन्नमाक्रियमपि कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वपरिच्छिन्नत्वक्रियावत्त्वाद्यभिमानेन स्वर्गादिलोकांत[illegible]गामित्वं व्यावहारि
कजीवत्वं चलभत इत्यर्थः मनोमयकोशं निरूपयति मनस्तु कर्मेंद्रियैः सहितं सन्मनोमयकोशो भवति सत्वगुणप्रधानं मनः रजोगु ६
णांशेभ्यो जातैर्वागादिकर्मेंद्रियैरेव सहितं सन्मनोमयकोश इत्यर्थः अत्र तु मनसः सत्वोपहितरजोवि[illegible]कारेच्छारूपत्वात्संकल्पवि
कल्पात्मकत्वेन बुद्ध्यपेक्षया जाड्याधिक्यान्मनोमयत्वं आत्माच्छादकत्वात्कोशत्वमिति भावः कर्मेंद्रियाण्युद्दिशति कर्मेंद्रियाणि वाक्
पाणिपादपायूपस्थाख्यानि एवामुत्पत्तौ साधनापेक्षायामाह एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते
वे भूतानां गुणत्वेपि रजोबहुलेभ्यो पृथक्पृथक्क्रमेणोत्पद्यंते रजोगुणप्रधानादाकाशाद्वागुत्पद्यते रजोगुणप्रधानाद्वायोः पाणींद्रियं रजो

सा

गुणप्रधानादग्नेः पादेंद्रियं रजोगुणप्रधानाज्जलात्पाय्विंद्रियं रजोगुणप्रधानायाः पृथिव्या उपस्थेंद्रियमुत्पद्यत इत्यर्थः वायूनुद्दिशति वायवः
प्राणापानव्यानोदानसमानाः यथोद्देशं प्राणस्य लक्षणमाह प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्त्ती ऊर्ध्वगमनशीलो नासाग्रस्थायी वा
युः प्राण इत्यर्थः अपानस्य लक्षणमाह अपानो नाम अवाग्गमनवान्पाय्वादिस्थानवर्त्ती अधोगमनशीलः पाय्वादिस्थायी वायुरपान इत्यर्थः
व्यानस्य लक्षणमाह व्यानो नाम विष्वग्गमनवानखिलशरीरवर्त्ती सर्वनाडीगमनशीलोऽखिलशरीरस्थायी वायुर्व्यान इत्यर्थः उदानस्य ल
क्षणमाह उदानो नाम कंठस्थानीय ऊर्ध्वगमनवानुत्क्रमणवायुः ऊर्ध्वमुत्क्रमणशीलः कंठस्थायी वायुरुदान इत्यर्थः समानस्य ल
क्षणमाह समानो नाम शरीरमध्यगताशितपीतान्नादिसमीकरणकरः शरीरमध्यगतान्नरसादिनेता वायुः समान इत्यर्थः प्राणादीनां
वायुत्वेन रूपेणैकत्वेपि क्रियाभेदेन भेद इत्यर्थः कपिलमतानुसारिणः क्रियाभेदेनान्येपि पंच वायवः संतीति वदंतीत्याह केचित्तु नाग
कूर्मकृकलदेवदत्तधनंजयाख्याः पंचान्ये वायवः संतीति वदंति तान्येव नामानि निर्दिशति नाग उद्गिर[illegible]णकरः कूर्म उन्मीलनकरः
कृकलः क्षुत्करः देवदत्तो जृंभनकरः धनंजयः पोषणकरः तथा चोक्तं उद्गारे नाग आख्यातः कूर्म उन्मीलने स्मृतः कृकलः क्षु
त्करो ज्ञेयो देवदत्तो विजृंभणे न जहाति मृतं चापि सर्वव्यापी धनंजयः इति वेदांतिनस्तु नागादीनां प्राणादिष्वंतर्भावं वदंतीत्याह एतेषां
प्राणादिष्वंतर्भावात्प्राणादयः पंचैवेति केचित् प्राणादिवायूनामुत्पत्तिकारणोपन्यासमाह एतत्प्राणादिपंचकमाकाशादिगतरजों
शेभ्यो मिलितेभ्य उत्पद्यते अपंचीकृतपंचमहाभूतेभ्यो रजःप्रधानेभ्यः प्राणादयो जायंत इत्यर्थः एतेषां प्राणादीनां प्राणप्रचुरत्वात्प्रा
णमयकोशो भवति तं आत्माच्छादकत्वात्कोशत्वं भवतीत्याह इदं प्राणादिपंचकं कर्मेंद्रियैः सहितं सत्प्राणमयकोशो भवति प्रा
णादीनां रजःप्रधानभूतकार्यत्वे निमित्तमाह अस्य क्रियात्मकत्वेन रजोंशकार्यत्वं प्राणादीनां क्रियात्मकत्वाद्रजःकार्यत्वमित्य
र्थः एतेषु पंचकोशेषु मध्ये विज्ञानमयमनोमयप्राणमयकोशानां क्रमेण ज्ञानेच्छाक्रियाशक्तिभेदेन कर्तृकरणक्रियारूपत्वं द
र्शयति एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान्कर्तृरूपः मनोमय इच्छाशक्तिमान्करणरूपः प्राणमयः क्रियाशक्तिमान्का
र्यरूपः तत्र हेतुमाह योग्यत्वादेवं तेषां विभाग इति वर्णयंति इदमेव कोशत्रयं सूक्ष्मशरीरमिति व्यवह्रियते एतत्कोशत्रयं मिलितं सत्सू
क्ष्मशरीरमित्युच्यते अस्य समष्टित्वे हेतुमाह अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषयतया वनवज्जलाशयवद्वा समष्टिः एकबुद्धी
ति चराचरप्राणिमात्रस्य यावंत्यनेतानि सूक्ष्मशरीराणि तेषां सर्वेषां सूक्ष्मशरीराणां सूत्रात्मना हिरण्यगर्भाख्येन स्वाश्रयैकबुद्धिविष
यीकृतत्वात्समष्टित्वमित्यर्थः तत्र दृष्टांतमाह वनवदिति अस्यैव सूक्ष्मशरीरस्य व्यष्टित्वं दर्शयति अनेकबुद्धिविषयतया तत्तव्ज

अगेरकेनरंजनमस
त

सर्वप्राणलिंगशरीरेषु अनुस्यूतत्वाद्विद्यमानत्वादित्यर्थः २

सर्वज्ञत्वादिरूपि भवति अनेकेषां जीवानां प्रत्येकं स्वस्वलिंगशरीरस्य स्वस्वबुद्धिविषयत्वेनानेकबुद्धिविषयतया व्यष्टित्वमित्यर्थः तत्र
दृष्टांतमाह वृक्षवदिति उक्तसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य सूत्रात्मत्वादिसंज्ञां दर्शयति एतत्समष्ट्युपहितं चैतन्यं सूत्रात्मा हिरण्यगर्भः प्राणश्चेत्युच्यते
तत्र हेतुमाह सर्वत्रानुस्यूतत्वादिति हेत्वंतरमाह ज्ञानेच्छाक्रियाशक्तिमदुपहितत्वात् (ज्ञानेच्छाक्रियाशक्तिमदपंचीकृतपंचमहाभूतानि मानि लाच्छे
६ ति) ज्ञानेच्छाक्रियाशक्तिमत्कोशत्रयोपाध्यवच्छिन्नत्वादित्यर्थः विज्ञानमयादिकोशत्रयस्य सूक्ष्मशरीरत्वं दर्शयति अस्यैषा समष्टिः स्थूलप्रपंचा
पेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं अस्य सू त्रात्महिरण्यगर्भाद्याख्यस्य विज्ञानमयादिकोशत्रयं सूक्ष्मशरीरं अस्य स्थूलशरी
रापेक्षया सूक्ष्मत्वादित्यर्थः अस्यैव विज्ञानमयादिकोशत्रयस्य स्वप्नत्वे युक्तिमाह जाग्रद्वासनामयत्वात् स्वप्नः विराट्स्वरूपेणानुभूतस्थूलप्र
पंचविषयकवासनामयत्वात् स्वप्नत्वमस्येत्यर्थः अत एव स्थूलप्रपंचलयस्थानमिति चोच्यते यतः स्थूलत्वं सूक्ष्मत्वं चात एव स्थूलप्रपंचलयस्थानमि
त्युच्यत इत्यर्थः विज्ञानमयादिसमष्ट्युपाध्यवच्छिन्नचैतन्यस्य हिरण्यगर्भत्वं प्रतिपाद्येदानीं व्यष्ट्युपलक्षितचैतन्यस्य तैजसत्वं निरूपयति एतद्व्यष्ट्यु
पहितं चैतन्यं तैजसो भवति तत्र हेतुमाह तेजोमयांतःकरणोपहितत्वात् अस्यापीयं व्यष्टिः स्थूलशरीरापेक्षया सूक्ष्मत्वादिति हेतोः सूक्ष्मशरीरं वि
ज्ञानमयकोशत्रयं व्यष्टिरूपं विज्ञानमयादिकोशत्रयं तैजसस्यापि सूक्ष्मशरीरमिति दर्शयति अस्यापि सूक्ष्मशरीरत्वे हेतुमाह स्थूलेति अस्यापि स्वप्नत्वे
हेतुमाह जाग्रद्वासनामयत्वात् स्वप्नः विश्वचैतन्येनानुभूतस्थूलशरीरविषयकवासनामयत्वात् स्वप्नत्वमित्यर्थः अस्यैव सूक्ष्मशरीरस्य स्थूलशरी
रलयस्थानत्वे हेतुमाह जाग्रद्वासनामयत्वात् स्थूलशरीरलयस्थानमिति चोच्यते यथा सर्वं प्राज्ञेश्वरावज्ञानवृत्तिभिः सुषुप्त्यवस्थायामानंद
मनुभवतः तथा हिरण्यगर्भतैजसावपि स्वप्नावस्थायां मनोवृत्तिभिर्वासनामयान् शब्दादिविषयाननुभवत इति दर्शयति एतौ सूत्रात्मतैजसौ त
दानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः इत्यस्मिन्नर्थे श्रुतिमुदाहरति प्रविविक्तभुक् तैजस इत्यादिश्रुतेः प्रविविक्तं भुंक्ते इति प्रविविक्तभुक् तैजसः
तेजोंऽतःकरणं कार्यादिभावेन पतितं तदेव स्थूलशरीरादिहीनं यस्य स तैजसः अंतःकरणस्वामीत्यर्थः इहापि विज्ञानमयादिकोशत्रयस्य स
मष्टिरूपस्य तदवच्छिन्नसूत्रात्मनश्च व्यष्टिरूपविज्ञानमयादिकोशत्रयस्य तदवच्छिन्नतैजसचैतन्यस्य वनवृक्षादितदवच्छिन्नाकाशादिदृष्टांतमुखेना
भेदं दर्शयति अत्रापि समष्टिव्यष्ट्योः तदुपहितसूत्रात्मतैजसयोर्वनवृक्षवत्तदवच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाभेदः ६
समष्टिव्यष्ट्युपाध्योर्वनवृक्षवज्जलाशयजलवच्चाभेदः उपाधिद्वयावच्छिन्नचैतन्ययोः सूत्रात्मतैजसयोरपि वनवृक्षावच्छिन्नाकाशवज्जलाशयजल
गतप्रतिबिंबाकाशवच्चाभेद इत्यर्थः सूक्ष्मशरीरोत्पत्तिप्रकरणमुपसंहरति एवं सूक्ष्मशरीरोत्पत्तिः अथेदानीं स्थूलशरीरोत्पत्तिं निरूपयितुमुपक्रमते स्थूल
भूतानि तु पंचीकृतानि तुशब्दः पूर्वस्माद्वैषम्यं दर्शयति पंचीकृतानीति अपंचीकृतसूक्ष्मभूतापेक्षया स्थूलभूतानि पंचीकृतानीत्यर्थः पंचीकरणमेव प्र
तिपादयितुं प्रतिजानीते पंचीकरणं तु पंचीकरणप्रकारमेवाह आकाशादिपंचस्वेकैकं द्विधा समं विभज्यते तेषु दशसु भागेषु प्राथमिकान् पंच भागा

स्थूलशरीरलय
स्थानमिति चोच्यते

नुप्रत्येकं चतुर्धा समं विभज्य तेषां चतुर्णां भागानां स्वस्वद्वितीयभागपरित्यागेन भागांतरेषु संयोजनं अयमर्थः सृष्टिकाले सकलप्राणिप्रदृष्टवशादी
श्वरप्रेरणया आकाशवायुतेजोबन्नान्यविद्यासहायभूतपरमात्मनः सकाशादनुक्रमजातानि तान्यपंचीकृतानि व्यवहारासमर्थानीति कृत्वा तदीयस्यौत्स्पावे
नायांवावहर्त्तप्राणिजातधर्माधर्मापेक्षयैव तान्येव भूतानि पंचीकृतानि भवंति तानि च प्रत्येकं द्वैविध्यमापद्यंते तेष्वाकाशादिषु द्वैधासु भागेषु प्राथमि
कान्पंचभागान्प्रत्येकं चतुर्धा समं विभज्य स्वार्द्धपरित्यागेन चतुर्णां प्रत्येकं भागांतरेषु सान्निवेशेन पंचीकृतानि स्थूलानि भवंतीति अस्मिन्नर्थे ऽसम
तिमाह द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंचते ति पंचीकरणस्य त्रिवृत्करण [illegible] प्रतिपादकश्रुत्यंतरविरोधमा
शंक्य परिहरति अस्याप्रामाण्यं नाशंकनीयं त्रिवृत्करण [illegible] श्रुतेः पंचीकरणस्याप्युपलक्षणत्वात् भूतत्रयस्य सृष्टिश्रुतौ सृष्टिपरिपूर्त्यर्थमत्राश्रुतमपि भू
तद्वयमाक्षिप्तभूतपंचकाभिप्रायेण भूतत्रयसृष्टिप्रतिपादनादविरोध इत्यर्थः आकाशादिपंचमहाभूतेषु चतुर्धा विभक्तानामन्येषां पंचभूतानां प्र
त्येकानुप्रवेशेन पंचीकृतानामाकाशादीनां पंचात्मकत्वाविशेषादाकाशादिव्यपदेशो न स्यादित्याशंक्य परिहरति पंचानां पंचात्मकत्वे समानेपि वैशे तेषु
ष्यात्तु तद्वादस्तद्वाद इति न्यायेनाकाशादिव्यपदेशः संभवति आकाशादीनां पंचानां पंचात्मकत्वे समानेपि तेषु पंचभूतेषु तद्विशेषानुप्रवेशान्नामभिर्व्यवहारः
संभवतीत्यर्थः तदानीमाकाशे शब्दोऽभिव्यज्यते यदापंचीकृतान्याकाशादीनि तदानीं स्थूलत्वेन स्वस्वकार्यसंपादनसमर्थत्वादाकाशोऽव्यक्तरूपेण स्थितः
शब्दोऽभिव्यज्यतेऽभिव्यक्तो भवतीत्यर्थः वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाः उक्तेभ्यो भूतेभ्यश्च
तुर्दशभुवनोत्पत्तिप्रकारं दर्शयति एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमिति तन्नामकानामुपर्युपरि विद्यमानानां [illegible]
मतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो विद्यमानानां लोकानां
ब्रह्मांडस्यांतर्गतानां चतुर्विधस्थूलशरीराणां तदुचितान्नपानादीनां चोत्पत्तिर्भवति एतेभ्यो भूतेभ्यः समुत्पन्नब्रह्मांडस्य चतुर्विधशरीराणां तद्योग्या
न्नपानादीनां चोत्पत्तिर्भवतीत्यर्थः चतुर्विधशरीराण्युपदिशति चतुर्विधशरीराणि जरायुजांडजस्वेदजोद्भिज्जानि तानि च यथोद्देशं विवृणोति जरा
युभ्यो जातानि मनुष्यपश्वादीनि अंडजानि अंडेभ्यो जातानि पक्षिपन्नगादीनि स्वेदजानि स्वेदेभ्यो जातानि यूकामशकादीनि उद्भिज्जानि भूमिमुद्भि
द्य जातानि तृणवृक्षादीनि एवंविधस्यापि समष्टिव्यष्टिभेदं दर्शयति अत्रापि चतुर्विधसकलस्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवद्वा
समष्टिः वृक्षजलवद्व्यष्टिरपि च भवति चतुर्विधशरीरजातमपि शरीरमित्येकबुद्धिविषयतया वनवत्समष्टित्वं प्रत्येकं तत्तच्छरीरविषयतया
नेकबुद्धिविषयत्वाद्व्यष्टित्वं लभत इत्यर्थः अधुना भूरादिचतुर्दशभुवनांतर्गतचतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यस्य वैश्वानरत्वाप
रपर्यायं वैराजत्वं दर्शयति एतत्समष्ट्युपहितं चैतन्यं वैश्वानरो विराडित्युच्यते तत्र युक्तिमाह सर्वनराभिमानित्वाद्विविधराजमानत्वाच्च सर्वप्राणि
निकायेष्वाहमित्यभिमानवत्त्वाद्वैश्वानरत्वं विविधं नानाप्रकारेण प्रकाशमानत्वाच्च वैराजत्वं लभत इत्यर्थः अस्यैषा समष्टिः स्थूलशरीरं

अस्यविराट्चैतन्यस्यैषा सर्वकार्योपाध्यंतर्गचतुर्विधस्थूलशरीरसमष्टिरेव स्थूलशरीरमित्यर्थः अन्नविकारत्वादन्नमयःकोशः स्थूलभोगायतनत्वाच्च स्थूलश
रीरं जाग्रदिति च व्यपदिश्यते अन्नविकारत्वादुत्पादन्नमयत्वमात्माच्छादकत्वात्कोशत्वं स्थूलशरीरादिविषयप्रयुक्तसुखदुःखभोगायतनत्वाच्च स्थूलशरी न
रं इंद्रियैरर्थोपलंभाच्च जाग्रदवस्थात्वं घटत इत्यर्थः चतुर्विधस्थूलशरीरसमष्ट्युपहितचैतन्यं सप्रपंचमभिधायेदानीं तद्व्यष्ट्युपहितं चैतन्यमभिधत्ते
८ एतद्व्यष्ट्युपहितचैतन्यं विश्वमित्युच्यते एतेषां चतुर्विधशरीराणां या व्यष्टिः तच्छरीरव्यक्तिः तदुपहितं चैतन्यं विश्व इत्युच्यत इत्यर्थः तत्र हेतुमाह सूक्ष्म
म शरीराभिमानं परित्यज्य स्थूलशरीराभिप्रविष्टत्वात् लिंगशरीराभिमानं परित्यज्य स्थूलशरीरेषु प्रविश्य तत्तत्स्थूलशरीरेषु सर्वेषु प्रत्येकमहमहमिति म
सौदु भिमानवत्त्वाद्विश्वत्वमित्यर्थः अस्याप्येषा व्यष्टिः स्थूलशरीरं अस्य चैतन्यस्याप्येषा तच्छरीरव्यक्तिविशेषलक्षणा व्यष्टिः सैव स्थूलशरीरमित्यर्थः अत्राप्यन्न
विकारत्वादुत्पादन्नमयत्वं चैतन्याच्छादकत्वात्कोशत्वं इंद्रियैरर्थोपलंभाज्जाग्रत्त्वं च प्रदर्शयति अन्नविकारत्वादेव हेतोरन्नमयः कोशः स्थूलभोगा ते
न्नमेण यतनत्वाज्जाग्रदिति चोच्यते अधुना जाग्रदवस्थायां विश्ववैश्वानरयोस्तत्तद्देवताधिष्ठितश्रोत्रादिभिः चतुर्दशभिः करणैः शब्दादिविषयग्रहणप्र
कारं दर्शयति तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादींद्रियपंचकेन क्रमाच्छब्दस्पर्शरूप रसगंधानग्न्य
नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रितेन वा गादींद्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदान् चंद्रचतुर्मुखशंकराच्युतैः क्रमान्नियंत्रि
तेन मनोबुद्ध्यहंकारचित्ताख्येनांतरिंद्रियचतुष्केन क्रमात्संकल्पविकल्पानिश्चयाहंकारचित्तांश्च सर्वानेतान्स्थूलविषयाननुभवतः अस्मिन्न
१ र्थे श्रुतिं संवादयति जागरितस्थानो बहिःप्रज्ञो वैश्वानर इत्यादिश्रुतेः जागरितं स्थानं यस्य स जागरितस्थानः बहीरूपादौ चक्षुरादिना बहिः प्रज्ञा य
स्य स बहिःप्रज्ञः स एव हि बहिःप्रज्ञः अनयोर्विश्ववैश्वानरयोर्वनहृक्षावच्छिन्नाकाशदृष्टांतेन जलाशयजलगतप्रतिबिंबाकाशदृष्टांतेनाभेदं वैन्तद
साधयति अत्राप्यनयोः स्थूलव्यष्टिसमष्ट्योः तदुपहितविश्ववैश्वानरयोश्च वनवृक्षावच्छिन्नाकाशवज्जलाशयजलगतप्रतिबिंबाकाशवच्च
पूर्ववदभेदः स्थूलप्रपंचोत्पत्तिमुपहरति एवं पंचीकृतभूतेभ्यः स्थूलप्रपंचोत्पत्तिः स्थूलसूक्ष्मकारणप्रपंचानां व्यष्टिभूतानां प्रत्येकविवक्षया
वांतरप्रपंचमभिधायेदानीं तेषां समष्टिरेव महाप्रपंचत्वं दर्शयति एतेषां स्थूलसूक्ष्मकारणप्रपंचानां समष्टिरेको महान्प्रपंचो भवति तत्र दृष्टां ८
तमाह यथावांतरवनानां समष्टिरेकं महद्वनं यथा वांतरजलाशयानां समष्टिरेको महाञ्जलाशयः यथा धवखदिरपलाशाद्यवांतरवनानां समष्टिः
समुदायविवक्षयैकं महद्वनं भवति यथा वापीकूपतडागाद्यवांतरजलाशयानां समष्टिः समुदायविवक्षयैको महान् जलाशयो भवति तथा स्थूल
कारणा सूक्ष्मकारणावांतरप्रपंचानां समुदाय एको महान्प्रपंचो भवतीत्यर्थः एतदेवावांतरमहाप्रपंचोपहितानां विश्वतैजसप्राज्ञानां वैश्वानरहिरण्यगर्भा
व्याकृतानां चावांतरवनावच्छिन्नाकाशवदवांतरजलाशयगतप्रतिबिंबाकाशवच्चाभेदः एतदुपहितं वैश्वानरादीश्वरपर्यंतं चैतन्यमप्यवांतर

ईत्याह विश्व १

वनावच्छिन्नाकाशवद्वा तरजलाशयगतप्रतिबिंबा[illegible]काशवच्चैकमेव चैतन्यप्रपंचयोर्भेदे सर्वं खल्विदं ब्रह्मेत्यादिश्रुत्याविरोधमाशंक्यपरिहरति आ(
श्यो महाप्रपंचस्तदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सत्तदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मेति वाक्यस्य वाच्यं भवति विविक्तं सल्लक्ष्यं भवति अन्यो
वाक्यस्य न्यतादात्म्यतयाध्यासेनापि [illegible] वाच्यं भवति अतदध्यासेनापि लक्ष्यं भवतीत्यर्थः अध्यारोपप्रकरणमुपहरति एवं वस्त्विति अवस्त्वारोपोऽध्यारोपः सा
मान्येन प्रदर्शितः ईश्वरचैतन्ये सामान्यतो महाप्रपंचाध्यारोपप्रकारं सप्रपंचमभिधायेदानीं प्रत्यगात्मनि विशेषाध्यारोपप्रकारं दर्शयितुमुपक्रमते
इद इदानीमिति इदानीं प्रत्यगात्मनि इदमयमयमारोपयतीति विशेषतः [illegible] उच्यते अतिप्राकृतस्तु प्रत्यगात्मादि सन्निहितस्यापत्यादिधर्मत्वादिदमिद स्व
मिति निर्देशः क्रियते इदमित्यादि वीप्सा तथा[illegible]चाति स्थूलबुद्धिस्तु इदमपत्यादिकं मे वाहं अयं पुत्र एवाहमिति संतत बाह्यधर्मान् विशेषेणात्मन्य
ध्यारोपयतीत्यर्थः तत्र श्रुतिमाह आत्मा वै जायते पुत्र इत्यादिश्रुतेः तत्र युक्तिमाह स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे पुत्रे नष्टे चाहमे
स्व व पुष्टो नष्टश्चेत्यनुभवाच्च पुत्र आत्मेति वदति यथा शरीरे प्रेमदर्शनादात्मत्वभ्रम एवं स्वपुत्रादिशरीरे प्रेमदर्शनादात्मत्वभ्रमः अत्रानुरूपमनुभवमा
चष्टे पुत्र इति एतदपेक्षया विशिष्टबुद्धिरन्यः कश्चिदधिकारी स्वदेहमेवात्मानं मन्यत इत्याह चार्वाक इति तत्रापि श्रुतिमाह स वा एष पुरुषोऽन्न
इंद्रियाणीत्यप्राणैः सह रसमयः इति श्रुतेः पुत्रादिशरीरस्यात्मत्वाभावे युक्तिं दर्शयन्नुत्तमाधिकारिणः सकाशात्स्वस्यैवेतरत्वं दर्शयति प्रदीप्तगृहात्स्वपुत्रं परित्यज्यापि स्व
इंद्रियाण्यात्मेति वदति स्य निर्गमनदर्शनात् देहस्यात्मत्वेऽनुभवं प्रमाणयति स्थूलोऽहं कृशोऽहमित्यनुभवाच्च स्थूलशरीरमात्मेति वदति ततोऽप्युत्कृष्टः कोऽप्यधिकारी श्रुति
इत्याह अपरश्चार्वाक युक्त्यनुभवेभ्यः इंद्रियाणामभावे शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेंद्रियाण्यात्मेति वदति ततोऽप्युत्तमाधिकारी कश्चिद्युक्ति
स्तु [illegible] प्रजाप प्रमाणानुभवैर्लौकिकः प्राण एवात्मेत्याह अपरश्चार्वाको अन्योऽन्तर आत्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनायोगादहमशनवानहं पिपा
तिमेव युक्त्यादि सावानित्याद्यनुभवाच्च प्राण आत्मेति वदति ततो विशिष्टोऽधिकारी कश्चित्स्वमतानुकूलश्रुत्यादिबलान्मन एवात्मेत्याह अन्यस्तु चार्वाकोऽन्यो
श्रुतेः १० ऽन्तर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावादहं संकल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति उक्तेभ्यः पंचभ्यः
विलक्षणः कश्चिद्विज्ञानवादी श्रुत्यादिभिर्विज्ञानमात्मेत्याह बौद्धस्तु अन्योऽन्तर आत्मा विज्ञानमय इत्यादिश्रुतेः कर्तुरभावे करणस्य शक्त्यभा
वादहं कर्ताहं भोक्तेत्याद्यनुभावाच्च बुद्धिरात्मेति वदति उक्तेभ्योऽतिरिक्तो प्रभाकरतार्किकौ स्वमतोपयोगिश्रुत्यादिसद्भावादज्ञानमात्मे
ति वदत इत्याह प्रभाकरतार्किकौ तु अन्योऽन्तर आत्मानंदमय इत्यादिश्रुतेः बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञोऽहमज्ञानीत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः
भट्टस्तु अज्ञानावच्छिन्नचैतन्यमात्मेत्याह भट्टस्तु प्रज्ञानघन एवानंदमय इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान्मामहं न जानामीत्याद्यनुभवाच्चाज्ञा प्रकाश
२२ नोपहितं चैतन्यमात्मेति वदति बौद्धैकदेशी कश्चिच्छ्रुत्यादिभिः शून्यमात्मेति वदतीत्याह अपरो बौद्ध असदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ स
र्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्श[illegible]च्चानुभवाच्च शून्यमात्मेति वदति अधुना पुत्रादिशून्यपर्यंतानां नात्मत्वप्रतिपादक(
म

पुत्रादेरारभ्य सर्वं सर्वमतस्योत्तरोत्तरमतबाध्यत्वाच्च दर्शय[illegible] जडत्वादिहेतुकदंबकैरनात्मत्वं प्रसिद्धमेवेति प्रतिपादयितुं प्रतिजानीते एतेषां पुत्रादी
नां शून्यपर्यंतानामनात्मत्वमुच्यते पुत्राद्यात्मवादिनामतिमंदाधिकारत्वात्तत्प्रतिपादकश्रुत्यादेरपि सर्वं सर्वस्योत्तरोत्तरबाध्यत्वात्पुत्रादिशून्यांतानाम
नात्मत्वं प्रसिद्धमेवेति प्रतिज्ञातमेवार्थं प्रकटयति एतैरतिप्राकृतादिभिरुक्तैः श्रुतियुक्त्यनुभवाभासैः पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरो
त्तरोक्तश्रुतियुक्त्यनुभवाभासैरनात्मत्वदर्शनात्पुत्रादीनामनात्मत्वं [illegible] स्पष्टमेव ननु पुत्रादीनां शून्यांतानामनात्मत्वं प्रसिद्धं क
स्मात् अहं प्रत्ययविषयस्यात्मत्वाशंका अस्थूलादिनिषेधवाक्यजातबोधितं तस्य संज्ञानमनंतं ब्रह्मेत्यादिविधिवाक्यकोटिबोधितं यत्सत्यज्ञानानंतानंद
प्रबल द्वयं ब्रह्म सत्यादिवाक्यमालंबनमिति श्रुतियुक्त्यनुभवैः प्रतिपादयितुमाह किंच प्रत्यगस्थूलोऽचक्षुरप्राणोऽमनोऽकर्ता चैतन्यं चिन्मात्रं सदित्यादिप्रबल
श्रुतिविरोधादस्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्याभासत्वेन घटादिवदनित्यत्वात् अस्थूलादिप्रबलश्रुतिवाक्यैः पुत्रादिशून्यपर्यंतानामात्मातिरिक्ता
त्मस्वरूपप्रतिपादनात् पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमित्यर्थः अस्मिन्नर्थे प्रबल[illegible] विद्वदनुभवं प्रमाणयति अहं ब्रह्मेति विद्वदनुभवप्राबल्याच्च वेदांत
पुत्रादिश्रुत्यादीनां च दौर्बल्यं दर्शयति तत्र श्रुतियुक्त्यनुभवाभासानां बाधितत्वादपि पुत्रादिशून्यपर्यंतमखिलमनात्मैव अतस्तत्तद्भासकं नित्यं शुद्धबुद्ध
वेदांत मुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति विद्वदनुभवः यतः पुत्रादीनां जडत्वादिहेतुभिरनात्मत्वमतः पुत्रादिभासकं नित्यशुद्धत्वादिस्वरूपमेवा
त्मवस्त्वित्यर्थः ननु इदं विरुद्धं यत्पुत्रादीनामात्मत्वप्रतिपादकश्रुतीनामप्रामाण्यमस्थूलादिश्रुतीनां प्रामाण्यमिति न हि वेदवाक्येषु केषांचिदप्रामाण्यं के
षांचित्प्रामाण्यमिति च शक्यते प्रतिपादयितुमेवं चेत् पुत्रादिश्रुतीनां प्रामाण्यमस्थूलादिवाक्यानामप्रामाण्यमिति वैपरीत्यं किं न स्याद्वेदवाक्यविशेषात्
वेद किं च केषांचिद्वाक्यानामप्रामाण्यप्रतिपादनार्थमिदं प्रकरणमारब्धमतो निर्णय इति चेत् उच्यते पुत्रादिश्रुतीनां सर्वथैव प्रामाण्यं नास्तीति न निषिद्ध्य
ते किं त्वस्थूलादिप्रबलश्रुतिस्मृतिन्यायविरोधात्स्वार्थे तात्पर्याभावात् तेषां स्थूलारुंधतीन्यायेन पूर्वपूर्वनिराकरणद्वारा सूक्ष्मसूक्ष्मवस्तुप्रदर्शने तात्प
र्यमिति तावदेव प्रतिपाद्यते तथा हि ध्रुवमरुंधतीं च दर्शयतीति विधिबलाद्वरवधोररुंधतीदर्शने प्राप्ते परं सूक्ष्म[illegible] रूपाया अरुंधत्याः प्रथमं कल्पायामेव भ८
प्रतिपत्तुमशक्यत्वात्तत्समीपं चंद्रज्योतीरूपारुंधतीत्युच्यते ततस्तत्संनिहिता तारकात्मकेत्युच्यते ततस्तत्तार[illegible]कान्विता सप्ततारकात्मकाऽरुंधतीत्यु
र च्यते तदनंतरमितरतारकाचतुष्टयान्विता तारका[illegible]तृतीयात्मकेत्युच्यते ततस्तन्मध्यतारकेत्युच्यते ततस्तत्समीपवर्तिनी परमसूक्ष्माऽरुंध
तीत्युच्यते न चैतावता तेषां पंचानां वाक्यानां परस्परविरुद्धार्थप्रतिपादकत्वेनाप्रामाण्यं शक्यं प्रतिपादयितुं किंतु प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रम
वत्पूर्वपूर्व निराकरणद्वारा सूक्ष्मारुंधतीप्रतिपादने तात्पर्यं तद्वदत्राप्यन्नमय प्राणमयो मनोमयो विज्ञानमय आनंदमय आत्मा ब्रह्म पुच्छं प्रतिष्ठा
पं३ इति पुच्छब्रह्मपर्यवसितानां पंचकोशवाक्यानामपि परस्परविरुद्धार्थप्रतिपादकत्वेऽपि प्रतिपत्तृबुद्ध्यनुसारेण सोपानक्रमवत्पूर्वनिराकरणद्वारा प सर्व
रमसूक्ष्मपुच्छब्रह्मप्रतिपादने तात्पर्यात् तस्मात्सर्वेषां वेदवाक्यानां साक्षात्परंपरया वाऽद्वितीयवस्तुप्रतिपादने तात्पर्यात्प्रामाण्याविरोधः इति संक्षे
पः विशेषाध्यारोपप्रकरणमुपसंहरति एवमध्यारोपः आत्मवस्तुनि मिथ्याप्रपंचस्य सामान्यतो विशेषतश्चाध्यारोपप्रकारं सप्रपंचमभिधा

पेदानीं तदपवादप्रकारं वक्तुमारभते अपवादो नाम असंगोदासी नपरात्मवस्तुनि तद्विवर्त्तो वस्तुभूतान्नानादिमिथ्याप्रपंचस्याविद्वस्तुमात्राव
शेषतयाऽवस्थानमेवापवाद इति वक्तुं प्रथमं लौकिकं दृष्टांतमाह रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्त्तस्यावस्तुनोऽज्ञानादेः प्रपंच
स्य वस्तुमात्रत्वं रज्जुस्वरूपापरित्यागेन सर्पाकारेणाभासमानस्य रज्जुविवर्त्तस्यापवादो नाशो नामाधिष्ठानरज्जुमात्रतयावस्थानं तद्वच्चिद्विवर्त्त
स्याज्ञानादिप्रपंचस्य नाशो नाम चिन्मात्रत्वेनावस्थानमित्यर्थः अत्र यथास्वरूपेणास्थितस्य वस्तुनोऽन्यथाभावो द्विधा भवति परिणामभावो विवर्त्त वै
भावश्चेति तत्र परिणामभावो नाम वस्तुनो यथार्थतः स्वस्वरूपं परित्यज्य रूपांतरापत्तिः यथा दुग्धमेव स्वस्वरूपं परित्यज्य दध्याकारेण परिण
मति विवर्त्तभावस्तु वस्तुनः स्वस्वरूपापरित्यागेन स्वरूपांतरेण मिथ्याप्रतीतिः यथा रज्जुः स्वस्वरूपापरित्यागेन सर्पाकारेण मिथ्या प्रतिभा
भास सते अत्र वेदांते ब्रह्मणि प्रपंचभानस्य परिणामभावो नांगीक्रियते दुग्धादिवद्ब्रह्मणो विकारित्वप्रसंगादनित्यत्वादिदोषापत्तेः वि
वर्त्तभावांगीकारे तु नायं दोषः ब्रह्मणि प्रपंचभानस्य मिथ्यात्वेन विकारित्वाभावात् तदुक्तं अधिष्ठानावशेषो हि नाशः कल्पितवस्तुन इति
तस्माच्चिद्विवर्त्तस्य प्रपंचस्य चिन्मात्रावस्थानमेवापवाद इति भावः अस्मिन्नर्थे ग्रंथांतरसंवादं दर्शयति सतत्वतोऽन्यथाप्रथा विकार इत्यु तदु-क्तं
दाहृतः अतत्वतोऽन्यथाप्रथा विवर्त्त इत्युदीरितः सामान्यतो दर्शितमप वादप्रक्रियां विस्तरेण प्रतिपादयितुं प्रतिजानीते तथाहि स्थूलसू
क्ष्मकारणप्रपंचानामुत्पत्तिवैपरीत्येन तत्तत्कारणरूपेणावस्थानमेवापवाद इत्याह एतद्भोगायतनं चतुर्विधसकलस्थूलशरीरजातं भो
ग्यरूपान्नपानादिकमेतदायतनभूतभूरादिचतुर्दशभुवनानि एतदायतनभूतब्रह्मांडं च एतत्सर्वमेतेषां कारणरूपं पंचीकृतभूतमात्रं भ
वति एतानि शब्दादिविषयसहितानि पंचीकृतानि भूतानि सूक्ष्मशरीरजातं चैतत्सर्वमेतेषां कारणरूपापंचीकृतभूतमात्रं भवति एता
नि सत्त्वादिगुणसहितान्यपंचीकृतान्युत्पत्तिव्युत्क्रमेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति एतदज्ञानमज्ञानोपहि
तं चैतन्यं चेश्वरादिकमेतदाधारानुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति एतत्स्थूलशरीरं स्वाश्रयब्रह्मांडसहितं स्वकारणभूतपंची
कृतेषु पंचमहाभूतेषु लीनं सत्तन्मात्रतयावतिष्ठते तानि च पंचीकृतानि शब्दादिसहि तानि सप्तदशावयवानि लिंगशरीरात्मकानि स्वकारणेऽप
पंचीकृतभूतेषु लीनानि भवंति तान्यपंचीकृतानि सत्त्वादिगुणसहितानि स्वकारणाज्ञानोपहितचैतन्ये लीनानि भवंति ततश्चाज्ञानं तदुपहितचैत
न्यं सर्वज्ञत्वादिविशिष्टं च स्वाधारभूतानुपहितचैतन्ये लीनं भवति चैतन्यमेवावशिष्यत इत्यर्थः फलितमाह आभ्यामध्यारोपापवादाभ्यां तत्त्वं
अपि प दार्थ शोधनसिद्धं भवति तत्त्वंपदार्थशोधनप्रकारं प्रतिजानीते तथाहि अज्ञानादिसमष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं
चैतन्यमेतदनुपहितं चैतन्यं चैतत्त्रयं तप्तायःपिंडवदे कत्वेनावभासमानं तत्पदवाच्यार्थो भवति अज्ञानं तदवच्छिन्नेश्वरचैतन्यमेतदनुप

हितं चैतन्यं तत्प्रायः पिंडवदन्योन्यतादात्म्याध्यासेनैकत्वेन प्रतीयमानं सत् तत्पदवाच्यार्थो भवति तत्पदलक्ष्यार्थमाह एतदु[illegible]पाध्युपहिता
धारभूतमनुपहितं चैतन्यं प्रत्यगानंदं तुरीयं [illegible] तत्पदलक्ष्यार्थो भवति अज्ञानावच्छिन्नेश्वरचैतन्यस्याधारभूतं यदनुपहितं तत्ताभ्यां विवि
क्तं सद्ब्रह्मेति विविक्तया तत्पदलक्ष्यार्थो भवतीत्यर्थः त्वंपदवाच्यार्थ[illegible]माह अज्ञानादिमच्छिरेतदुपहितमल्पज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहि
१० तं चैतन्यं तत्प्रायः पिंडवदेकत्वेनावभासमानं त्वंपदवाच्यार्थो भवति व्यष्टिभूतं यदज्ञानमंतःकरणं तदवच्छिन्नं जीवचैतन्यं तदनुपहितं चैतन्यं चै
तन्यं तत्प्रायः पिंडवत्परस्परतादात्म्याध्यासेनाभेदविवक्षया त्वंपदवाच्यार्थो भवतीत्यर्थः त्वंपदलक्ष्यार्थमाह एतदुपाध्युपहिताधारभूतमनुपहि
तं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपदलक्ष्यार्थो भवति अंतःकरणोपहितचैतन्यत्रयस्य आधारभूतं यदनुपहितं प्रत्यगात्माभिन्नं तुरीयं चैतन्यं त्वंपदल
क्ष्यार्थो भवतीत्यर्थः पदार्थमभिधाय वाक्यार्थमाह अथ महावाक्यार्थो वर्ण्यते ननु जीवेश्वरयोः किंचिज्ज्ञत्वसर्वज्ञत्वविशिष्टयोरत्यंतविल
क्षणयोस्तत्त्वमस्यादिमहावाक्यानि परस्परविरुद्धार्थप्रतिपादकानि कथमखंडैकरसं ब्रह्म प्रतिपादयंतीत्याशंक्य साक्षादैक्यप्रतिपादकाभावे त्पा
पि लक्षणया संबंधत्रयेणाखंडार्थबोधकानि भवंतीत्याह इदं तत्त्वमस्यादिवाक्यं संबंधत्रयेणाखंडार्थबोधकं भवति संबंध[illegible]त्रयस्वरू
पमाह संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभावः प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभावश्चेति पदार्थप्रत्यगात्म
नां संबंधत्रयसद्भावे वृद्धसंमतिमाह तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मनामिति पदयोः सा
मानाधिकरण्यं सुराहरणेन दर्शयति सामानाधिकरण्यसंबंधस्तावत् यथा सोयं देवदत्त इत्यस्मिन्वाक्ये तत्कालविशिष्टदेवदत्तवाचकशब्द
स्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिंडे तात्पर्यसंबंधः भिन्नप्रवृत्तिनिमित्तयोः शब्दयोरेकस्मिन्नर्थे प्रवृत्तिः सामानाधिक
रण्यं तत्र सोयं देवदत्त इति वाक्ये सशब्दस्य तत्कालतद्देशवैशिष्ट्यं प्रवृत्तिनिमित्तं एतत्काल एतद्देशवैशिष्ट्यमयंशब्दस्य प्रवृत्तिनिमित्तं
तथा भिन्नप्रवृत्तिनिमित्तयोः सोयंशब्दयोरेकस्मिन्देवदत्तपिंडे तात्पर्यसंबंधः सामानाधिकरण्यमित्यर्थः उक्तमर्थं दार्ष्टांतिके प्रयोजयति १०
तथा तत्त्वमसीति वाक्येपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वादिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसं
बंधः तथा तत्त्वमसीति वाक्ये परोक्षत्वसर्वज्ञत्वादिवैशिष्ट्यं तत्पदप्रवृत्तिनिमित्तं अपरोक्षत्वकिंचिज्ज्ञत्वादिवैशिष्ट्यं त्वंपदप्रवृत्तिनिमि
त्तं तथा च भिन्नप्रवृत्तिनिमित्तयोस्तत्त्वंपदयोरेकस्मिंश्चैतन्ये तात्पर्यसंबंधः विशेषणविशेष्यभावसंबंधस्वरूपमाह विशेषणविशेष्यभा
वसंबंधस्तु यथा तत्रैव सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दार्थैतत्कालविशिष्टदेवदत्तस्यान्योन्यभेदव्यावर्तकतया विशेषणविशेष्य
भावसंबंधः व्यावर्त्तकं विशेषणं व्यावर्त्यं विशेष्यं तथा च सोयं देवदत्त इति वाक्ये एवायंशब्दवाच्यो यः स एव तत्कालतद्देशसंबंधविशिष्टदेवदत्त
पिंडोयं सशब्दवाच्यस्तत्कालतद्देशविशिष्टदेवदत्तपिंडाद्भिन्नो नातिदूरप्रतीयते तदा तच्छब्दार्थस्यायंशब्दवाच्यार्थनिष्ठभेदव्याव

र्त्तकतयाविशेषणत्वमयं शब्दार्थस्य व्यावर्त्तत्वाद्विशेष्यत्वं पदाच्च सद्भूति तच्छब्दवाच्यतत्कालतद्देशविशिष्टो देवदत्तपिंडो सोयमितीदं शब्दवा
च्यादेतत्काले तद्देशसंबंधविशिष्टादस्माद्देवदत्तपिंडादन्नभिद्यतेइतियदाप्रतीयते तदायंशब्दवाच्यस्य तच्छब्दार्थनिष्ठभेद
व्यावर्त्तकतयाविशेषणत्वं तच्छब्दार्थस्य भावर्त्तत्वाद्विशेष्यत्वं तथा चायमेव समन्वय इति अन्योन्यभेदव्यावर्त्तकतया सोयं शब्दार्थयोः पर
स्परं विशेषणविशेष्यभाव इत्यर्थः उक्तं विशेषणविशेष्यभावं दार्ष्टान्तिके योजयति तथात्रापि तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य वाक्ये
त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभावः इहापि तत्त्वमसिवाक्येपि त्वंपदवाच्यं यदपरोक्षत्व ते
किंचिज्ज्ञत्वादिविशिष्टं चैतन्यं तत्सर्ववाच्यात्सर्वज्ञत्वादिविशिष्टचैतन्यान्न भिद्यते इति यदा प्रतीयते तदा तच्छब्दस्य तत्पदार्थनिष्ठभेदव्याव
र्त्तकतया विशेषणत्वं त्वंपदार्थस्य विशेष्यत्वं यदा च तत्पदवाच्यं यत्सर्वज्ञत्वादिविशिष्टचैतन्यं तत्त्वंपदवाच्यात्किंचिज्ज्ञत्वादिविशिष्टचैतन्यान्न
भिद्यत इति यदा प्रतीयते तदा त्वंपदार्थस्य तत्पदार्थनिष्ठभेदव्यावर्त्तकत्वेन विशेषणत्वं तत्पदार्थस्य विशेष्यत्वं तदा त्वं तदसीति तत्त्वमसीति व्यावर्त्तत्वात्
तत्त्वंपदार्थयोः परस्परभेदव्यावर्त्तकत्वेन परस्परं विशेषणविशेष्यभाव इत्यर्थः क्रमप्राप्तं लक्ष्यलक्षणसंबंधस्वरूपं निरूपयितुमाह लक्ष्यलक्ष
णसंबंधस्तु यथा तत्सोयं शब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्तेन सह लक्ष्यलक्षणसंबंधः अ
साधारणधर्मप्रतिपादकं वाक्यं लक्षणवाक्यं तत्प्रतिपाद्यमविशिष्टं च वस्तु लक्ष्यं तथा च सोयं देवदत्त इत्यस्मिन्नेव वाक्ये सोयं शब्दयोस्तदर्थ
वा योर्विरुद्धतत्कालैतत्कालविशिष्टत्वपरिहारेण विरुद्धदेवदत्तपिंडेन सह देवदत्तत्वविशिष्टवाचकदेवदत्तशब्दस्य लक्ष्यलक्षणभावसंबंध इत्य
र्थः उक्तमर्थं दार्ष्टान्तिके योजयति तथात्रापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेनाविरुद्धचैत
न्येन सह लक्ष्यलक्षणभावः इहापि तत्त्वंपदयोस्तदर्थयोर्विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वपरित्यागेन तत्त्वंपदाभ्यामविरुद्धचै
तन्येन सह तत्त्वंपदयोर्लक्ष्यलक्षणभावसंबंधः एवं तत्त्वंपदयोस्तदर्थयोर्वा स्वरूपविरुद्धांशपरित्यागेनाखंडचैतन्यस्य लक्ष्यत्वमिति
भावः ननु तत्त्वमस्यादिवाक्यानां लक्ष्यलक्षणभावसंबंधपुरस्कारेण चैतन्यबोधकत्वमित्युक्तमन्यत्र तु शास्त्रे तेषां वाक्यानां
भागलक्षणया चैतन्यबोधकत्वं प्रतिपाद्यते तत्त्वमस्यादिवाक्येषु लक्षणा भागलक्षणा इत्यादिविरोधमाशंक्य संज्ञाभेदेन वस्तुभेद
इत्याह इयमेव भागलक्षणेत्युच्यते तत्त्वमस्यादिवाक्यानां विरुद्धांशपरित्यागेनाविरुद्धचैतन्यमात्रबोधकत्वमेव भागलक्षणेत्युच्य
त इत्यर्थः ननु यथा नीलोत्पलमिति वाक्ये नीलत्वविशिष्टनीलगुणस्योत्पलत्वविशिष्टोत्पलद्रव्यस्य च स्वव्यतिरिक्तशुक्लादिगुणांतर
पटादिद्रव्यांतरव्यावर्त्तकत्वेन विशेषणविशेष्यभावनिरूपिततद्भिन्नसंसर्गस्य नीलगुणवैशिष्ट्यस्य वा वाक्यार्थत्वं तथैव हापि तत्त्वमस्यादिवाक्ये परोक्षत्वा
विशिष्टचैतन्यस्यान्योन्यभेदव्यावर्त्तकतया विशेषणविशेष्यभूतसर्वज्ञत्वकिंचिज्ज्ञत्वोभयनिरूपितसंसर्गो दिविशिष्टचैतन्यस्या
परोक्षत्वादि

वा सर्वज्ञत्वादिविशिष्टस्य किंचिज्ज्ञत्वादिविशिष्टेन सहैक्यं वा वाक्यार्थो भव[illegible] लि[illegible]त्याशंक्य दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यान्नैवमित्याह अस्मिन्निता
दिना अस्मिन्वाक्ये नीलमुत्पलमिति वाक्यवद्वाक्यार्थो न संगच्छते अस्मिंस्तत्त्वमसीति वाक्ये नीलोत्पलमिति वाक्यवत्संसर्गो वा विशिष्टो वा वाक्या
र्थो न संगच्छते इत्यर्थः नीलोत्पलमिति वाक्यस्य संसर्गविशिष्टार्थप्रतिपादकत्वकल्पने विरोधाभावं दर्शयति तत्र तु नीलपदार्थ नीलगुणस्योत्पल
१७ पदार्थोत्पलद्रव्यस्य च [illegible] शुक्ल[illegible] पटादिव्यावर्तकतयान्योन्यविशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा [illegible]
क्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाभावात्तद्वाक्यार्थः संगच्छते नीलोत्पलपदार्थयोर्गुणगुणिनोर्विशेषणविशेष्यभावसंसर्गस्य नीलगुण
विशिष्टोत्पलयोरैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षत्वादिप्रमाणान्तरविरोधाभावात्तत्र तथा संगच्छते इति भावः तत्त्वमसीति वाक्ये तु तत्त्वंपदार्थयोः र्थ
सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्ट[illegible] जीवचैतन्ययो[illegible] [illegible]योर्वाक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरवि
रोधात्सर्वस्माद्वैषम्यं दर्शयति अत्र तु तदर्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्यभेदव्यावर्तकतया
विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य तदैक्यस्य वा वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाद्वाक्यार्थो न संगच्छते तदु
क्तं संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः इति ननु तत्त्वमस्यादिवाक्यमखण्डार्थकं बोधयति जहल्लक्षणया वाक्य
म[illegible] जहल्लक्षणया वा अजहल्लक्षणया वा जहदजहल्लक्षणया इति त्रिधा विकल्प्य आद्ये दूषणमाह अत्र तु [illegible] अत्र तत्त्वमसीति वाक्ये जहल्लक्षणा न संगच्छत इत्यर्थः तदेव द
अत्र तु॰ र्शयितुं जहल्ल[illegible]क्षणाया उदाहरणं तावदाह गंगायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणापि न संगच्छते मानान्तरविरोधे तु मुख्यार्थस्यापरिग्रहे मुख्यार्थे
नाविनाभूते प्रवृत्तिर्लक्षणेष्यते इति वचनाद्गंगायां घोषवसनासंभवाद्गंगायां घोष इति वाक्यस्य मुख्यार्थ[illegible]स्य विरोधे सति मुख्यार्थं परित्यज्य तत्
या सम्बन्धस्यात्तत्संबन्धितीरे घोषावस्थानप्रतिपादनात्तत्र जहल्लक्षणाङ्गीकारो युक्त इत्याह तत्र तु गंगाघोषयोराधाराधेयत्वलक्षणस्य वाक्यार्थस्याशे
षतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबन्धितीरलक्षणाया युक्तत्वाज्जहल्लक्षणा संगच्छते आधाराधेयभावलक्षणं सर्वथा परित्यज्येत्यर्थः
तत्त्वमसीति वाक्ये प्राक्प्रतिज्ञातं जहल्लक्षणाऽसंभवमाविष्करोति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वाक्यार्थ[illegible]स्य भागमा
त्रे विरोधात् तु शब्दः पूर्वस्माद्वैषम्यं द्योतयति तत्त्वमसीति वाक्ये परोक्षत्वापरोक्षत्वप्रतिपादकत्वांशे विरोधाच्चैतन्यैकत्वेपि विरोधाभावाद्गंगाघोषा ११
दिवाक्यवत्सर्वांशे [illegible] मुख्यार्थपरित्यागासंभवाज्जहल्लक्षणा न संभवतीत्यर्थः तत्र हेतुमाह भागान्तरमपि परित्यज्यान्य[illegible]लक्षणाया अयुक्त
त्वाज्जहल्लक्षणा न संगच्छते विरुद्धयोः परोक्षत्वापरोक्षत्वयोरेकत्वासंभवेन तत्परित्यागेपि चैतन्यभागस्यैकत्वे विरोधाभावात्त्यागो न युज्यते इत्य
र्थः ननु यथा गंगायां घोषः प्रतिवसतीति वाक्ये गंगापदं प्रवाहलक्षणं स्वार्थं परित्यज्य स्वसंबन्धितीरपदार्थं लक्षयति तथा तत्त्वमसीति वाक्येपि तत्प
दं स्वार्थं परोक्षत्वविशिष्टं परित्यज्य जीवचैतन्यं लक्षयतु एवं त्वंपदमपि स्वार्थं किंचिज्ज्ञत्वादिविशिष्टं परित्यज्येश्वरचैतन्यं लक्षयतु तस्माज्जहल्ल[illegible] वा

र्थ वा

लक्षणैव भवत्वित्याशंक्य निराकरोति न च गंगापदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयति तथा तत्पदं त्वंपदं स्वार्थपरित्यागेन तत्पदार्थं [illegible] त्वंपदा
र्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न संगच्छते इति वाक्यं निराकरणप्रकारमेवाह तत्र तीरपदाश्रवणेन तदर्थाप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायाम्
पि तत्त्वंपदयोः श्रूयमाणत्वेन तदर्थप्रतीतौ लक्षणया पुनरन्यतरपदेनान्यतरपदार्थप्रतीत्यपेक्षाया अभावाच्च श्रुतवाक्यस्य मुख्यार्थविरोधे मुख्यार्थ अ२
संबंधिन्यश्रुतपदार्थे लक्षणेति सर्वजनप्रसिद्धं तथा गंगायां घोषः इत्यत्र श्रुतवाक्यार्थस्य गंगाघोषयोराधाराधेयभावस्य विरोधे श्रूयमाणं गंगा संबंधस्य
पदं स्वार्थपरित्यागेन तीरपदार्थं यथा लक्षयतीति युक्तं गंगापदार्थस्य तीरपदार्थप्रतीतिसापेक्षत्वात् इह तु श्रूयमाणतत्त्वंपदयोर्मुख्यतयैव तदर्थ
सर्वज्ञत्वकिंचिज्ज्ञत्वादिविशिष्टप्रतीतौ सत्यामपि लक्षणया तत्पदेन त्वंपदार्थप्रतीत्यपेक्षाभावात् त्वंपदेन तत्पदार्थप्रतीत्यपेक्षाभावाच्च मुख्यार्थे सं
=सति, भवति लक्षणाया अन्याय्यत्वाज्जहल्लक्षणा न संभवतीत्यर्थः अजहल्लक्षणापि न संभवतीत्याह अत्र शोणो धावतीत्यादिवाक्यवदजहल्लक्षणापि न सं
भवतीति अत्र तत्त्वमसीति वाक्येऽजहल्लक्षणापि न संभवतीत्यन्वयः कुत इत्यत आह तत्र शोणगुणगमन[illegible]लक्षणस्य वाक्यार्थस्य विरुद्धत्वा ए,
त्तदपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवादजहल्लक्षणा संभवति अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वस्य
वाक्यार्थस्य विरोधात् तदपरित्यागेन तत्संबंधिनो यस्य कस्यचित्पदार्थस्य लक्षितत्वेऽपि तद्विरोधपरिहारासंभवादजहल्लक्षणापि न संभवत्येव
तत्र शोणो धावतीत्यादिवाक्ये शोणगुणस्य गमनासंभवेन वाक्यस्य मुख्यार्थविरोधे सति श्रूयमाणं शोणपदं स्वार्थापरित्यागेन स्वाश्रयमपरि
त्यक्तमश्वादिकं लक्षयतीति युक्तं अत्र तत्त्वमस्यादिवाक्ये तत्त्वंपदार्थस्य परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य मुख्यवाक्यार्थस्य विरुद्ध
त्वात् परोक्षत्वापरोक्षत्वापरित्यागेन तद्विशिष्टचैतन्यलक्षणार्थस्य लक्षितत्वेऽपि तद्विरोधपरिहाराभावादजहल्लक्षणा न संभवतीत्यर्थः ननु तत्प
दं स्वार्थविरुद्धपरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन त्वंपदार्थं किंचिज्ज्ञत्वादिविशिष्टं जीवचैतन्यं लक्षयतु त्वंपदं वा स्वार्थवि
रुद्धापरोक्षत्वादिधर्मं परित्यज्याविरुद्धचैतन्यांशापरित्यागेन तत्पदार्थं सर्वज्ञत्वादिविशिष्टमीश्वरचैतन्यं लक्षयतु किं भागलक्षणांगीकारे
णेत्याशंक्य निराकरोति न च त्वंपदं तत्पदं वा स्वार्थविरुद्धांशपरित्यागेनांशांतरसहितं त्वंपदार्थं तत्पदार्थं वा लक्षयतु अतः कथं प्रकारेण भागल सांत
क्षणांगीकरणमिति वाच्यं एकेन पदेन स्वार्थांशपरित्यागेन पदार्थांतरोभयलक्षणाया असंभवात् एकेन त्वंपदेन तत्पदेन वा स्वार्थांशपरित्यागेन प
दार्थांतरोभयलक्षणाऽसंभवादित्यर्थः अजहल्लक्षणाऽसंभवे हेत्वंतरमाह पदां[illegible]तरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च तत्प
वा देन त्वंपदेन तत्तदर्थप्रतीतौ सत्यां लक्षणया पुनरन्यतरप्रतीत्यपेक्षाभावादित्यर्थः अतः परिशेषात्तृतीयपक्षत्वं भागीकरणं इत्युपसंहरति
तस्माद्यथा सोऽयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थस्यांशे विरोधाद्विरुद्धतत्कालैतत्कालविशिष्टांश
परित्यज्याविरुद्धं देवदत्तांशमात्रं लक्षयति तस्मादिति यस्मात्तत्त्वमस्यादिवाक्ये जहल्लक्षणाजहल्लक्षणयोरसंभवस्तस्माज्जहदजहल्लक्षण द
या विरुद्धांशं परित्यज्याविरुद्धमखंडचैतन्यमात्रं लक्षयतीति योजना तत्र दृष्टांतमाह यथेति यथा सोऽयं देवदत्त इति वाक्ये प्रागुक्तजहल्लक्षणा

ऽजहल्लक्षणयोरसंभवेन तदर्थस्य तत्काल... तद्देशविशिष्टस्यैतद्देशैतत्कालविशिष्टस्य देवदत्तस्य वा वाक्यार्थस्यैकांशमुन्तंशे तत्कालैतत्कालवैशि
ष्ट्यभागे विरोधदर्शनात् तत्परित्यागेनाविरुद्धदेवदत्तपिंडमात्रं लक्षयतीत्यर्थः नमानांतरविरोधइत्युक्तन्यायेनेत्यर्थः उक्तमर्थं दार्ष्टांतिके यो
जयति तथा तत्त्वमसीतिवाक्यं तदर्थो वा परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणस्य वा वाक्यार्थस्यांशे विरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वां दिविशिष्ट
१२ शं परित्यज्याविरुद्धमखंडचैतन्यमात्रं लक्षयतीति तथा तत्त्वमस्यादिवाक्यस्यापि परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणमुख्यार्थप्र
तिपादकत्वासंभवा जहदजहल्लक्षणया विरुद्धपरोक्षत्वापरोक्षत्वादिवैशिष्ट्यांशं परित्यज्याविरुद्धाखंडचैतन्यमात्रप्रतिपादक
सं त्वं तस्येत्यर्थः अखंडचैतन्यमात्रप्रतिपादकस्य तत्त्वमसीतिवाक्यस्यार्थप्रपंचमभिधायेदानीं यावनुर्वेधानुभववाक्यार्थो वर्ण्यत इत्याह अ
याधुनाहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते गुरुमुखान्मेवकत्वस्त त्वमस्यादिवाक्यश्रवणादेहाद्यहंकारांतजडपदार्थदृश्यविलक्षणप्रत्य
गात्मनः शुद्धेन परमात्मना सहैकत्वबोधनानंतरं कश्चिदधिकारी लब्धावसरः सर्वोपाधिविनिर्मुक्तं सच्चिदानंदैकरसमनुभवेनाजिज्ञासु
राचार्योपदेशमहं ब्रह्मास्मीतिवाक्यार्थमनुस्मरन्नस्वात्मानंदमनुभवतीत्यर्थः तत्प्रकारमेवाह एवमित्यादिना एवमाचार्येणाध्यारोपापवाद
पुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थे बोधितेऽधिकारिणोऽहं नित्यशुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्य
खंडाकाराकारिता चित्तवृत्तिरुदेति एवं संक्षेपेण प्रमाणप्रकारेणाधिकारिणश्चित्तवृत्तिरुदेतीत्यतिसंबंधः कदेत्यपेक्षायामाह आचार्येणेति
आचार्येण विषये संतानिपुणले चैतन्ये प्रारभ्यमानायमानाविद्याहंकारादिपाशीतंत मिथ्यापदार्थमध्यारोप्य तदपवादपुरःसरं तत्त्वंपदार्थौ शो दे
धयित्वा तत्त्वमसीतिवाक्येन जहदजहल्लक्षणयाविरुद्धांशपरित्यागेनाखंडार्थचैतन्ये ज्ञापिते सतीत्यर्थः किंविषयिणी चित्तवृत्तिरुदेतीत्यपे
क्षां निवारयति अहमिति अहं प्रत्यगात्मा परं ब्रह्मास्मीत्यन्वयः ब्रह्मा नित्यत्वं कंनिराकरोति नित्येति शुद्धपदेनाविद्यादिदोषराहित्यं बुद्ध
पदेन स्वप्रकाशस्वरूपत्वे जडाद्यादिकं व्यवच्छिद्यते मुक्तपदेन सर्वोपाधिराहित्यं सत्यपदेनासंविनाशिस्वभावत्वं परमानंदपदेन वैषयिकमनुष्या
नंदादिचतुर्मुखानंदपर्यंतानां कर्मजन्यत्वेन सातिशयत्वेन नाशित्वेन च तुच्छत्वात्तेभ्यो विलक्षणं निरतिशयानंदस्वरूपं प्रतिपाद्यते अनं १२
तपदेन घटादिवत्परिच्छेदराहित्येन देशतः कालतश्च वस्तुतश्चापरिच्छिन्नत्वं बोध्यते अद्वयमिति नानात्वनिषेधेनैकत्वं विबोध्यत इत्यर्थः ननु यथादी
पप्रभादित्यमंडलं न प्रकाशयति न च प्रयोजनमस्ति नित्यशुद्धस्वप्रकाशमात्मानं जडा चित्तवृत्तिः कथं विषयीकरोति किं प्रयोजनं ... चेत्या
शंक्याह सा चित्प्रतिबिंबसहिता सती प्रत्यगभिन्नमज्ञातं परं ब्रह्म विषयीकृत्य तद्गतमज्ञानमेव बाधते सा चित्तवृत्तिर्न शुद्धब्रह्मविषयिणी
किं त्वज्ञानविशिष्टप्रत्यगभिन्नपरब्रह्मविषयिणी साच चैतन्यप्रतिबिंबसंवलिता चैतन्यगतमज्ञानं निवर्तयति तस्याश्चैतन्यावरकाज्ञाननाति मतो
वृत्तिरेव प्रयोजनमित्यर्थः न त्वधिकारिणस्तत्त्वमस्यादिवाक्यश्रवणात्संजाताखंडचैतन्यवृत्त्या तदाश्रिताज्ञाने निवारितेपि तत्कार्यस्य सक

तच्चराचरप्रपंचस्य प्रसरत्तया भासमानस्य कथमद्वैतसिद्धिरित्याशंक्य कारणाज्ञाननाशे तत्कार्यसकलप्रपंचनाशाददैतसिद्धिरिति समाह
धानमाह ... एवं कारणं तंतुदाहे पटदाहवद् अखिलकारणेऽज्ञाने बाधिते सति तत्कार्यस्याखिलस्य बाधितत्वात्तदंतर्भूताऽखंडाकार
कारितचित्तवृत्तिरपि बाधिता भवति ननु चाज्ञाननाशेन तत्कार्यप्रपंचस्य नाशो भवतु तथाप्यखंडाकारवृत्तेरनिवृत्तेरद्वैतहानिरित्या चित
शंक्याह तदंतर्भूतेति अखंडाकारवृत्तेरपि अज्ञानतत्कार्यांतर्भूतत्वात् तन्निवृत्त्या तन्निवृत्तेर्नाद्वैतहानिरित्यर्थः ननु तथाप्यखंडा
कारवृत्तिप्रतिबिंबितचैतन्याभाससत्त्वात्कथमद्वैतसिद्धिरित्याशंक्याह तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभादित्यप्रभावभासना भा
समर्था सती तया अभिभूता भवति तथा स्वयंप्रकाशमानप्रत्यगभिन्नपरब्रह्मावभासनानर्हं तया तेनाभिभूतं सत् स्वोपाधिभूताखंडवृत्ते नै
बाधितत्वाद्दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रवत्प्रत्यगभिन्नपरब्रह्ममात्रं भवति वृत्तिनिवृत्तौ तत्प्रतिबिंबितचैतन्यस्य स्वावभासनास
मर्थत्वात् स्वोपाधिबाधेन तत्प्रतिबिंबचैतन्यमपि चैतन्यमात्रतयावशिष्यते दर्पणोपाधिविगमे तत्प्रतिबिंबितमुखाभासस्य बिंबभूत
मुखमात्रतावशेषवदित्यर्थः अयं भावः शोधिततत्त्वंपदार्थस्याधिकारिणस्तदवजृंभितगुरुशास्त्रादिभ्यस्तत्त्वमस्याद्युपदेशेनाहं नित्य
नंता शुद्धबुद्धमुक्तसत्यपरमानंदाद्वयाखंडब्रह्मास्मीति चित्तवृत्तिरुदयमासादयति तदानीमेव तस्यामभिव्यक्ताखंडचैतन्यबलेन तत्त्वं पीडिता भ परि
अखंडाकारवृत्तिरपि ज्ञाननाशो भवति तदानीं तत्कार्यस्य सर्वस्य नाशाद् अभिव्यक्तिविषयमेव कतककरजोवद् ... नजाने ... दुरस्य ... जलशां
त्यर्थं पीततत्प्रजलवद्वनष्टा भवति तदानीं तद्गताभासोपि स्वोपाधिभूतवृत्तिनाशात् स्वप्रकाशात्मावभासनासमर्थतया दर्पणविगमे त
ति दुपाधिकस्य स्वाधि... मुखमात्रवदधिष्ठानमात्रो भवतीति वेदांतसिद्धांतरहस्यमिति अत्र तस्यानुभवः लोकाश्च भांतिपरमे
मतिमोहजन्याः स्वप्नेंद्रजालमरुनीरसमा विचित्राः व्युत्थानकाल इह न स्फुरत्यविभुरूपप्रत्यग्सुखाब्धिपरमात्मतत्त्वचित्तवृत्तौ मनः
परं न खलु विश्वमथापि भाति मध्ये च सर्वमपरं न रसं गतु स्यं मायोत्थशास्त्रगुरुवाक्यसमुत्थबोधभानुप्रभाविलसते क्व गतं न जाने
निरतिशयसुखाब्धिस्वप्रकाशे परेऽस्मिन्कथमिदमविवेकादुत्थितं ... क्वनुगतमधुना तद्वेद्मि को वा श्रुतिर्वा परमविमलबोधेऽमु
ष्मिन्नहं न जाने तदेतत्सर्वं मननिदिध्यासोपसंहरति प्रत्यगभिन्नेति ननु मनसैवानुद्रष्टव्यं मनसैवेदमाप्तव्यं दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्म
या या सूक्ष्मदर्शिभिः बुद्ध्यालोकनसाध्योऽस्मि न चक्षुर्भ्याम् ... ता यदि बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भवेदित्यादि श्रुतिस्मृतीनां यतो
वाचो निवर्तंते अप्राप्य मनसा सह यन्मनसा न मनुते अन्यदेव तद्विदितादथो अविदितादधि अविज्ञातं विजानतां विज्ञातमविजानतां अ
यत नाशिनोऽप्रमेयस्य द्रष्टा ज्ञातं त्वयाविप्रतिपन्नमात्मना ताभ्यां मतं न विद्धि यद्धि तदद्भुतमित्यादिश्रुतिस्मृतीनां परस्परविरोधमाशंक्य परिहर
ति एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुत इत्यनयोरविरोधाय एवमुक्तप्रकारेण ज्ञातचैतन्यस्य वृत्तिव्याप्यत्वांगीकारेण फलव्या

अस्मिन्नर्थे ग्रंथांतरं संवादयति २

प्यत्वेप्रतिबिंबसतीत्यर्थः तदेवाह वृत्तिव्याप्यत्वांगीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् अंतःकरणवृत्तिरावरणनिवृत्त्यर्थमज्ञानावच्छि-
न्नं चैतन्यं व्याप्नोतीति तद्वृत्तिव्याप्यत्वमंगीक्रियते आवरणभंगानंतरं स्वयंप्रकाशमानं चैतन्यं फलचैतन्यमित्युच्यते तस्मिन्फलचैतन्ये नि-
१९ ष्फलं केचिन्न वृत्तिर्न व्याप्नोति आवरणभंगस्य प्रागेव जातत्वेन प्रयोजनाभावादित्यर्थः तदुक्तं फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितं ब्रह्म-
ण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति वृत्तिप्रतिबिंबितचैतन्याभासस्यापि फलचैतन्यप्रकाशत्वं नेत्यत्रापि संमतिमाह स्वयंप्रकाशमानत्वान्ना-
13 भास उपयुज्यत इति च जडपदार्थाकाराकारितचित्तवृत्तेर्विशेषोऽस्ति इदानीं जडपदार्थविषयकचित्तवृत्तेर्ब्रह्माकारवृत्त्यपेक्षया वैलक्ष-
ण्यं दर्शयितुमाह जडपदार्थेति अहं ब्रह्मास्मीत्यज्ञानावच्छिन्नब्रह्माकारवृत्तिस्तदावरकमज्ञानं निवर्तयति ब्रह्म तु स्वप्रकाशमानत्वात्स्व-
यमेव प्रकाशते न तु वृत्तिप्रतिबिंबितचिदाभासेन चैतन्यं प्रकाशते तस्य तत्रासामर्थ्यात् अयं घट इति घटाकाराकारितचित्तवृत्तिस्तु घटा-
वच्छिन्नचैतन्यावरकमज्ञानं निवर्त्यमाना स्वप्रतिबिंबितचिदाभासेन घटमपि प्रकाशयति अतस्ततो विशेषोऽस्तीति इत्यर्थः एतदेव प्रपंचयितुं प्रति-
जानीते तथाहीति अयं घट इति घटाकाराकारितचित्तवृत्तिरज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन ज-
डं घटमपि भासयति जडपदार्थविषयिणीं चित्तवृत्तिमभिनीय दर्शयति अयमिति वृत्तिसंबंधात्प्राक् घटस्यापि अज्ञातत्वादज्ञातं घटं विष-
यीकृत्य प्रवृत्ता चित्तवृत्तिर्घटाज्ञानं दूरीकुर्वाणा घटमपि भासयतीत्यर्थः अस्मिन्नर्थे वृद्धसंमतिमाह तदुक्तं बुद्धितत्स्थचिदाभासौ द्वाव-
पि व्याप्नुतो घटं तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् बुद्धिश्च तत्र बुद्धौ प्रतिबिंबिताचिदाभासश्च बुद्धितत्स्थचिदाभासौ द्वावेतौ बु-
द्धिचिदाभासौ घटं व्याप्नुतः तत्र तयोर्मध्ये धिया बुद्ध्या घटाज्ञानं नश्येच्चिदाभासेन तु घटः स्फुरेत् अत्रानुरूपं दृष्टांतमाह यथा दीपप्रभा-
मंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरसनपूर्वकं स्वप्रभया तदपि भासयतीति यथांधकारावस्थितं घ- ध
टादिकं विषयीकृत्य प्रवर्तमानं दीपप्रभामंडलमंधकारगतं घटपटादिकं विषयीकृत्य तद्गतांधकारनिरसनपुरःसरं स्वप्रभया तदपि भा-

घटावरकांधकारगतं त्वपि पाठः १

सयतीति तद्वदित्यर्थः इयता ग्रंथजालेन प्रतिपादितस्य प्रत्यगभिन्नपरमानंदाखंडचैतन्यस्य साक्षात्कारलक्षणमखंडाकारांतःकरणवृत्तिं १२
पि प्रतिपादयितुं तत्साधनभूतश्रवणादेरवश्यानुष्ठेयत्वं तेषां लक्षणानि च क्रमेण दर्शयति एवंभूतेत्यादिनाऽद्वैतं वस्तु भासते इत्यंतेन
य एवंभूतस्य स्वस्वरूपचैतन्यसाक्षात्कारपर्यंतं श्रवणमनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यंते श्रवणं नाम षड्विधलिं-
गैरशेषवेदांतानामद्वितीयवस्तुनि तात्पर्यावधारणं लिंगानि तु उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अर्थवादोपपत्ती च लिंगं तात्पर्य-
निर्णये प्रकरणप्रतिपाद्यस्यार्थस्याद्यंतयोरुपपादनमुपक्रमोपसंहारौ यथा छांदोग्ये षष्ठप्रपाठके प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः
एकमेवाद्वितीयमित्यादावैतदात्म्यमिदं सर्वमित्यंते च प्रतिपादनं प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः यथाद्वितीय

वस्तुनः

यथा तं त्वौपनिषदं पुरुषं पृच्छामीति

वस्तुनो तत्त्वमसीति नवकृत्वः प्रतिपादनं प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणम् अपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मा
नान्तराविषयीकरणं फलं तु प्रकरणप्रतिपाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचार्यवान्पुरुषो वेद तस्य तावदेव
चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते प्रकरणप्रतिपाद्यस्य तत्र प्रशंसनम् अर्थवादः यथा तत्रैव उत तमादेशम
प्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमित्यद्वितीयवस्तुप्रशंसनं प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिरु
पपत्तिः तत्र यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादावद्वितीयवस्तुसा
धने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते मननं तु श्रुतस्याद्वितीयवस्तुनो वेदान्तानुगुणयुक्तिभिरनवरतमनुचिन्तनं विजातीय
देहादिप्रत्ययरहिताद्वितीयवस्तुनो सजातीयप्रत्ययप्रवाहो निदिध्यासनं समाधिर्द्विविधः सविकल्पको निर्विकल्पकश्चेति तत्र सवि
कल्पको नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाद्वितीयवस्तुनि तदाकाराकारिताया चित्तवृत्तेरवस्थानं तदा मृण्मयगजादिभानेऽपि मृद्भानवद्द्वैत
भानेऽप्यद्वैतं वस्तु भासते एवंभूतस्योक्तश्रुतियुक्त्यनुभवैर्निरस्तसमस्तोपाधिप्रत्यगभिन्नपरमानन्दचिद्रूपस्य साक्षात्कारपर्यन्तश्रवणादीननु
ष्ठेयानीति प्रतिजानीते तेऽपीति श्रवणादयोऽपीत्यर्थः तत्र श्रवणस्य लक्षणमाह षड्विधेति लीनमर्थं गमयतीति लिङ्गं शब्दस्य श्रुतस्तत्वे ब्रह्मात्मैकत्व
निर्णयैकरूपकमोपसंहारादिषड्विधलिङ्गैः सर्वेषां वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः श्रवणमित्यर्थः तानि च लिङ्गानि क्रमेण प्रद
र्शयति उपक्रमेति तथा चोक्तं उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिश्चये इति उपक्रमोपसंहारौ तावद्दर्शय
ति प्रतिपाद्यस्येति तदुदाहरणं दर्शयति यथेति एकमेवाद्वितीयमित्युपक्रमे ऐतदात्म्यमिदं सर्वमिति पादेन उपक्रमोपसंहारावित्यर्थः अभ्यासस्य प्रति
लक्षणमाह पौनःपुन्येनेति अत्रापि श्रुतिमुदाहरति यथेति अपूर्वत्वस्य तं प्रमाणान्तरेति तं त्वौपनिषदं पुरुषं पृच्छामीत्यादिश्रुतिनिरूपनिषन्मा
त्रवेद्यत्वप्रतिपादनाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः क्रमप्राप्तस्य फलस्य लक्षणमाह फलं त्विति अत्रानुरूपमुदाहरति आचार्यवानिति श्रवणादिसाध
नानां ब्रह्मात्मैकत्वविज्ञानं प्रयोजनं ब्रह्मज्ञानस्य तु तत्प्राप्तिः फलं ब्रह्मविद्ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतिरित्यर्थः पंचमलिंगस्यार्थ
वादस्य लक्षणमाह प्रशंसनमिति प्रकरणप्रतिपाद्याद्वितीयब्रह्मस्वरूपस्तावकवाक्यमर्थवाद इत्यर्थः अत्रापि श्रुतिमाह उत तमादेशमप्राक्ष्ये
त्यादिये नाश्रुतं श्रुतं भवतीति येन सकलप्रपंचाधिष्ठानब्रह्मस्वरूपश्रवणेनाश्रुतं प्रपंचजातमपि श्रुतं भवति येन ब्रह्मज्ञानेनाज्ञातं सर्वं जगज्ज्ञा
तं भवति येन ब्रह्मसाक्षात्कारेणासाक्षात्कृतं साक्षात्कृतं भवति ब्रह्मणः सर्वतः संप्लुतोदकस्थानीयत्वादित्यर्थः अवशिष्टायाः उपपत्तेर्ल
क्षणमाह युक्तिरिति तामुदाहरति यथेति मृद्विकारेषु घटादिषु विकारनामधेययोर्वाचारम्भणमात्रत्वान्मृत्स्वमेवावशिष्यते नान्यत् तथा चिदि
वर्तस्य प्रपंचस्य जनिनदीसमुद्रात्मकविकारनामधेययोर्वाचारम्भणमात्रत्वाच्चिन्मात्रमेवावशिष्यते रज्जुविवर्तस्य सर्पस्य रज्जुमात्रावशेषवदि
त्यर्थः श्रवणनिरूपणानन्तरं तदुत्तराङ्गस्य मननस्य लक्षणमाह मननं त्विति बुद्धिस्थलिंगतात्पर्यमवर्तकं श्रुतस्याद्वितीयब्रह्मणो वेदान्तविरोधि

लक्षणमाह ब्रह्मबोधत्वस्य प्रकाशानन्दत्वं व्यावहारिकत्वातिरिक्तप्रमाणानपेक्षत्वाद्ब्रह्मणोऽपूर्वत्वमित्यर्थः ॥ ०

नीभिर्युक्तिभिर्नैरंतर्येणानुचिंतनं मननमित्यर्थः निदिध्यासनलक्षणमाह विजातीयेति विजातीयदेहादिबुद्ध्यंतजडपदार्थनिराकरणेन सजातीया
द्वितीयवस्तुविषयकप्रत्ययप्रवाहीकरणं निदिध्यासनमित्यर्थः व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ चित्तस्यैकाग्रतापरिणामः समाधिः
सचाद्विविधस्त्याह सविकल्पको निर्विकल्पश्च तस्य लक्षणमाह तत्रेति तत्र तयोः सविकल्पनिर्विकल्पकयोर्मध्ये सविकल्पकोपि द्विविधः अहं ब्रह्मा
१४ स्मीति शब्दानुविद्धतयाऽद्वितीये वस्तुनि चित्तवृत्तेरवस्थानमित्येकः द्वितीय[illegible]स्तु ज्ञातृज्ञानज्ञेयत्रिपुटीविलयानपेक्षयाऽहं ब्रह्मास्मीति शब्दानुविद्ध न
१५ द्धतयाद्वितीये वस्तुन्यविच्छिन्नचित्तवृत्तेरवस्थानमित्यर्थः ननु भासितेपि लघुनेन भांतोप्याधारेतिन्यायेनोक्तसविकल्पकसमाधौ सकलभे
दनिराकरणाय प्रवर्त्तमानयोरपि ज्ञात्रादिभेदविषयत्वेन ना[illegible]द्वैतवस्तुभानं तत्रेत्याशंक्योत्तरमाह तदेति तदा सविकल्पकसमाध्यनुभवकाले ज्ञात्रा
प दिभेद[illegible]प्रतीतावप्यद्वैतवस्तु भासत एव सुवर्णमयकुंडलादि[illegible]भाने सुवर्णभानवन्मृण्मयघटादिभाने मृद्भानवत् घटादिभानस्य वा
चारंभणमात्रत्ववत् ज्ञात्रादिभानस्यापि वाचारंभणमात्रत्वादद्वैतमेव वस्तु भासत इत्यर्थः यद्वा खल्विदं सर्वं ब्रह्म ऐतदात्म्यमिदं सर्वमित्यादिश्रु
तिबलात् सर्वमहमिति गिरिनदीसमुद्रात्मकं सर्वं जगत् स्वाभिन्नसच्चिदानंदब्रह्मत्वेनानुभूय तस्य दग्धपटन्यायेन प्रपंचभानेप्यद्वैत
सच्चिदानंदलक्षणं ब्रह्म भासत एवेत्यर्थः तदुक्तं वासुदेवः सर्वमिति स महात्मा सुदुर्लभः इति मूलकारोप्यस्मिन्नर्थे ग्रंथांतरसमत्तिं दर्शयति
यदुक्तं दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरं अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त[illegible] ओमिति यस्परं ब्रह्म त
देवाहमस[illegible]न्वयः किं तदित्याह दृशिस्वरूपमिति दृशिर्दृष्टिस्तस्याः रूपं द्रष्टृत्वं तद्यस्य परमात्मस्वरूपस्य तद्दृशिस्वरूपं साक्षिस्वरूपमित्यर्थः
तदुक्तं भगवता उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः पर इति पुनः किंरूपं तत् गगनोपमं गगनमुपमा दृष्टां
तो यस्य तत् गगनोपमं गगनवन्निर्लेपमित्यर्थः तथा च भगवद्वचनं यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते सर्वत्रावस्थितो देहे तथा[illegible]त्मा नो
पलिप्यते इति यद्वा ग[illegible]गनोपमं गगनवदमूर्त्तस्वरूपमित्यर्थः [illegible] आकाशस्वरूपं ब्रह्मेत्यादिश्रुतेः पुनः किंभूतं सकृद्विभातं
सकृदेकदैव विभातं सर्वदैकस्वरूपेन विभातं भासमानं चंद्रादिप्रकाशवन्न वृद्धिक्षयशीलमित्यर्थः पुनः किंरूपमजं जन्मरहितमेकं निरस्तस
न र्वोपाधिभेदं अक्षरं विनाशधर्मरहितं कूटस्थरूपमित्यर्थः तथा च भगवतोक्तं क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते अलेपकमसंगत्वादवि १४
द्यादिदोषरहितमित्यर्थः असंगो ह्ययं पुरुष इति श्रुतेः सर्वगं ब्रह्मस्थावरांतेषु भूतेषु गतं व्याप्तं अद्वयं सजातीयविजातीयभेदरहितत्वेनाद्वितीयर
सर्वगतं हितमित्यर्थः सततं विमुक्तमिति सर्वकार्यकारणात्मकसर्वोपाधिविनिर्मुक्तत्वेन सततैकरूपमित्यर्थः तथा च भागवते बद्धो मुक्त इति व्याख्या गुण
तो मे न वस्तुतः इति तथा च एतादृशं निरतिशयानंदं यत्परं ब्रह्म तदेवाहमिति भावयतो निषेधप्रतियोगित्वेन तत्तदुपाधिभानात्तत्तद्युक्तभेदभाने
प्यद्वैतं भासत एवेत्यर्थः निर्विकल्प[illegible]कसमाधिलक्षणमाह निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पलयापेक्षयाऽद्वि[illegible]तीयवस्तुनि तदाकाराका
भेद

अयं पंचविधः चिरकालाभ्यस्तपटुतरसविकल्पकसमाध्यनुभवजनितसंस्कारसहकृतायाश्चित्तवृत्ते २

रितायावृत्तेरतितरामेकीभावेनावस्थानं तत्र तु जलाकाराकारितलवणानवभासेन जलमात्रावभासव[त्] द्वितीयवस्त्वाकाराकारितचित्तवृत्त्यन
वभासेनाद्वितीयवस्तुमात्रमेवावभासते ततश्चास्य सुषुप्तेश्चाभेदशंका न भवति उभयत्र वृत्त्यभाने समानेपि तत्सद्भावासद्भावमात्रेण तयोर्भेदोप
पत्तेः ज्ञात्रादित्रिपुटीलयपूर्वकमद्वैतवस्तुन्येकभावनात्मकः प्रथमः तेनानिर्विकल्पसमाध्यभ्यासपाटवे न तु पुनः संस्कारः तथा ज्ञात्रादित्रिपुटील
यपूर्वकमखंडाकाराकारितायाश्चित्तवृत्तेर्विनापि स्फूर्तिकेवलचिदा[न]ंदात्मनात्मको द्वितीयः तत्र द्वितीयपदमभिप्रेत्याह ज्ञातृज्ञानादी
ति नन्वेवं समाधिसुषुप्त्योर्विक्षेपाभावेन वृत्त्यभा[वे]नाभेदमाशंक्य परिहरति ततश्चेति तत्र युक्तिमाह उभयत्रेति समाधिसुषुप्त्योरित्यर्थः त
त्सद्भावेति समाधावनुज्ञायमानवृत्तिसद्भावात् सुषुप्तौ वृत्त्यभावाच्च तयोर्भेदोपपत्तेरित्यर्थः उक्तसमाधेः साधनापेक्षितायामाह अस्यांगानि यमनियमास
नप्राणायामप्रत्याहारधारणाध्यानसमाधयः तानि च साधनानि क्रमेणोद्दिशति यमेति यमाद्यष्टौ निर्विकल्पसमाधेरंतरंग साधनानीत्यर्थः प्रथमं यम ना
स्य लक्षणमाह तत्राहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः तेषु यमाद्यष्टांगेषु मध्ये ऽहिंसादयः पंच यमा अनुष्ठेया इत्यर्थः तदनंतरं
नियमानाह शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः आसनं लक्षयति करचरणादिसंस्थानविशेषलक्षणानि पद्मकस्वस्तिकादीनि
आसनानि प्राणायामलक्षणमाह रेचकपूरककुंभकलक्षणाः प्राणनिग्रहोपायाः प्राणायामाः इडया पूरयेद्वायुं मुंचेद्दक्षिणयानिलं यावच्छासं ध्या
म्णा समासीनः कुंभयेत्तु सुषु[म्ण]या यदा योगी पद्मासनमुपविश्य योगमभ्यसति तदा गुल्फाभ्यां गुदकमलं निपीड्य खेचरीमुद्रासहायेन प्राणधारणया सुषुम्णा
मार्गेण मूलाधारकुंडलिनीमुत्थाप्य स्वाधिष्ठानमणिपूरका[नाहत]विशुद्धाज्ञानि वर्णितस्वरूपषट्चक्रभेदक्रमेण सहस्रदलकर्णिकायां विद्यमानपरमात्मना स्रह
संयोज्य तत्रैवाचिरं निवर्तितापवर्गबलं कृत्वात्मानंदरसं पिबतीति रसेतस्य प्राणायामफलं स च द्विविधो ऽगर्भः सगर्भश्चेति मुंचेद्दक्षिणया वायुं मात्राहीनमननम्
मा धीः पूरयेद्वामया तद्वत्कुंभयेच्च सुषुम्णया यावच्छ्वासं जितश्वासो भवेन्मासाज्जितेंद्रिय इति प्रणवोच्चारणादिरहितेनोक्तरेचकपूरककुंभकक्रमेण प्राणनिरो
धोऽगर्भप्राणायामः रेचयेत् षोडशेनैव तद्द्विगुण्ये न पूरयेत् कुंभयेच्च चतुःषष्ट्या प्रणवार्थमनुस्मरन्निति वचनात् षोडशप्रणवं मनसा जपन्
दक्षिणया वायुं विरेच्य द्वात्रिंशत्संख्याकं प्रणवं मनसा जपन् वामया वायुमापूर्य चतुःषष्टिसंख्याकं प्रणवं मनसा जपन् तदर्थं चाकारोकारमकाराद्
मात्रात्मकसार्द्धत्रिवलयाकारकुंडलिनीरूपं चिदानंदकंदं च मूलाधारादिब्रह्मरंध्रांतमनुसं[..]दधत् सुषुम्णया चित्तमपि तदेकप्रवणं कुर्वन्यावच्छ्वा
सं कुंभयेत् तदुक्तमाचार्यैः षोडशद्विगुणचतुःषष्टिमात्रास्विति तानि च क्रमशः रेचकपूरककुंभकभेदैस्त्रिविधप्रभंजनायामः इति प्राणायामप्र
कारः क्रमप्राप्तं प्रत्याहारं निरूपयति इंद्रियाणां स्वस्वविषयेभ्यः प्रत्याहरणं प्रत्याहारः श्रोत्रादीनामिंद्रियाणां स्वस्वविषयेभ्यः शब्दादिभ्यः सकाशा
त्प्राणो परिप्रयुक्तः प्राणसंघातस्तत्प्रत्यावर्तनं प्रत्याहारः नन्विंद्रियादीनां स्वस्वविषयेभ्यो निवर्तनं प्रत्याहारः इत्युक्तं तन्न संभवति शब्दादिविष
याणां सुखसाधनत्वेन वैषयिकसुखव्यतिरिक्तनिरतिशयानंदसद्भावे प्रमाणाभावाद्[..]रप्यगमादिमत्तभोगस्येश्वरेणाक्षिप्तकुमराकत्वादिति
चेन्न मूढैः कर्मजडैर्विषयलंपटैस्तत्कुमनाकत्वेपि मुमुक्षुभिः तु कस्मिन्न संसाराशाविघातकत्वदर्शनाद्विषयदोषदर्शनेन तुच्छीकृतशब्दादिविषयप्रपंचेन मु

पुरीषवत

रूपो समेनैतस्य कुशाक्यत्वात् अन्यथा संसार एव लोलुप्येत तस्मान्न्योऽसमेषां तपसामतिरिक्तमाहुः एतमेव लोकमभीप्संतः प्रव्राजिनः प्रव्रजंतीति एत
न त्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत् त्यागेनैकेऽमृतत्वमानशुः ब्रह्मचर्यादेव प्रव्रजेत् यदहरेव विरजेत्तदहरेव प्रव्रजेत् वनाद्वा गृहाद्वा वि
१५ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्यमाश्रिताः प्रत्यग्विविदिषायां वेदा
नुवचनादयः ब्रह्मसंस्थोऽमृतत्वमेतीति श्रुतेर्वचनात् इत्यादि श्रुतिस्मृतिभिस्तथानंदो ब्रह्मेति व्यजानादिति तस्यैवान्यानि भूतानि मात्रामुपजीवं नंदस्य
तीति एषोऽस्य परमानंद आत्मैवानंदो देवदेव आकाश आनंदो न स्याद् आनंदादेव खल्विमानीत्यादि श्रुतिभिश्चानित्यात्मसुखस्य प्रतिपादितत्वात् शब्दादिवैषयिक
सुखव्यतिरिक्तनित्यानिरतिशयानंदसद्भावे प्रमाणाभावादित्येतदपनिरस्तं वोध्यं संप्रति धारणां लक्षयति अद्वितीयवस्तुन्यंतरिंद्रियावधारणं धा
रणा सर्वेषां बुद्धिसाक्षितयावधमाने वस्तुनि चित्तनिक्षेपणं धारणेत्यर्थः धारणापाटवाभावेन चित्तस्यैकाभावाद् अद्वितीयवस्तुनि विच्छिद्यविच्छि
द्य चित्तवृत्तिप्रवाहीकरणं ध्यानं नाम स्यादत अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यांतरिंद्रियप्रवाहो ध्यानं समाधिरुक्त एव सविकल्पकः समाधिः इत्याह
समाधिरुक्त सविकल्पक एव उक्तयमाद्यष्टांगसहितानिर्विकल्पकसमाधेर्निर्विघ्नानुष्ठानसिद्ध्यर्थं विघ्नान् व्यतिरेकेण निवारणेन
न्नुमशक्यत्वात् अस्य च लयादिविघ्नान्दर्शयति एवमस्यांगिनो निर्विकल्पस्य लयविक्षेपरसास्वादलक्षणाश्चत्वारो विघ्नाः संभवंति तत्राद्यं विघ्नं ल कषाय
यति लयस्तावत् लयो द्विविधः चिरकालमुक्ताष्टांगसहितनिर्विकल्पकसमाध्यभ्यासपाटवेनातितप्तलोहतलक्षिप्तजलबिंदुवत्तैलरहित
दीपकलिकावत्स्वप्रत्यगभिन्ने परमानंदे चित्तवृत्तेर्लयः प्रथमः द्वितीयस्तु मूर्छावस्थावदालस्येन चित्तवृत्तेर्बाह्यशब्दादिग्रहणादर्शने सति प्रत्यगात्मस्वरू
पानवभासनाद्वृत्तेर्मंदीभावलक्षणनिद्रारूपः तत्राद्यमंगीकृत्य द्वितीयस्य विघ्नत्वेन तत्त्यागाय तत्स्वरूपमाह अखंडवस्तुग्रहणायां तमुखतया प्रव अखंडवस्त्वनवलंबने
त्तायाश्चित्तवृत्तेः रागादिवासनया स्तब्धीभावादखंडवस्त्वनवलंबनं कषायः रागादयश्चैव विधा वाह्याः आभ्यंतरावासनामात्र रूपाश्चेति वाह्याः चित्तवृत्तेर्निद्रादि
पुत्रादिरूपाः आभ्यंतरा मनोराज्यादयः संस्काररूपा वासनामया तत्रानेकजन्माभ्यस्तरागादिरनुभवजनितसंस्कारैः केनचित्कृते यादिश्चमाह अखंडव
चित्तं कथंचित्सुषुप्त्यवगाद्विक्षाधनैस्तमुखमपि चैतन्यग्रहणसामर्थ्याभावान्मध्य एव स्तब्धीभवति यथा राजदर्शनाय स्वगृहान्निर्गत्य राज स्त्वनवलंवनेन चित्त
मंदिरं प्रविष्टस्य कस्यचित् पुरुषस्य द्वारपालनिरोधेन स्तब्धीभावः तथापरित्यक्तवाह्यविषयस्याखंडवस्तुग्रहणाय प्रवृत्तस्य दुरितागादि नेरस्यावलंवनं दोषः
संस्कारैः स्तब्धीभावादखंडवस्त्वग्रहणं कषाय इत्यर्थः चतुर्थं विघ्नमाह अखंडवस्त्वनवलंबनेनापि चित्तवृत्तेः सविकल्पकानंदरसास्वादः १४
उक्तसविकल्पकसमाध्यो मध्ये द्वितीयो रसास्वादः नु विक्षेपपूर्वी विशिष्टस्तस्मिन्नित्यानंदो वा यस्माद्वाह्यविषयप्रपंचभानस्त्यागयुक्तो ननु चित्तसोऽपि
चैतन्यप्रयुक्तः यथा धिग्रहणाय प्रवृत्तस्य निधिपालकभूतप्रेताद्यावृतस्य निधिप्राप्त्यभावेऽपि भूताद्यनिष्टनिवृत्तिमात्रेण कोऽपि महानंदो भवति
तथा सविकल्पकसमाधावखंडवस्त्वनवलंबनेन नित्यानंदरसास्वादनाभावेऽपि अनिष्टवाह्यप्रपंचानिवृत्तिजन्यानंदं सविकल्पकपुत्रलानंदं अमेण

निर नै६ वाह्यांतर

वि न

स्वादयति तद्रसास्वादन[illegible]मित्यर्थः तत्राणां तस्मात्समाध्यारंभसमये सविकल्पकानं
दास्वादनं वा निर्विकल्पकसमाध्यारंभकालेऽनुभूयमानसविकल्पकानंदत्यागात्तद्धि सुतया पुनस्तस्यैव स्वादनं रसास्वाद इत्यर्थः । उक्तविघ्नचतुष्ट
यनिवृत्तेः फलमाह अनेनाविघ्नचतुष्टयेन विरहितं चित्तं निर्वातदीपवदचलं सदखंडचैतन्यमात्रमवतिष्ठते यदा तदा निर्विकल्पसमाधिरुच्यते ल
यादिविघ्नाभावसहितं चित्तं यदा निर्वातदीपवदचलमखंडचैतन्यमात्रमवतिष्ठते तदा निर्विकल्पकसमाधिरित्यर्थः । लयादिविघ्नसद्भावे तन्निवृत्तिप्रका द
रं वदद्भिः संमतिमाह तदुक्तं लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात्समप्राप्तं न चालयेत् नास्वादयेद्रसं तत्र निःसंगः प्रज्ञ
या भवेत् इति पूर्वोक्तनिद्रालक्षणे लये जाते सति तन्निवृत्त्यर्थं चित्तं संबोधयेत् चित्तगतजाड्यादिपरित्यागेन चित्तमुद्बोधयेत् उक्तविक्षेपयुक्तं
चित्तं यदा भवति तदा विषयवैराग्यादिना चित्तं प्रशमयेत् बहिर्मुखवृत्तिं परित्यज्यांतर्मुखं कुर्यात् उक्तकषायादिसहितं यदा चित्तं भवेत् तदा विजानीया
त् इदं रागादिवासना बाह्यविषयप्रापिका न तु वस्त्वखंडप्रापिकाऽतो नेयं समीचीनेति विविच्य प्रत्यक्प्रवणवासनाया [illegible] रागादीयं न रुद्धा[illegible]तस्सा सका
ज्ञेयमित्यर्थः यदा समप्राप्तं वस्तु समप्राप्तं चित्तं यदा भवति तदा तच्चित्तं कषायसहितं विजानीयात् चित्तं यावत् कालेन रागादिवासनासहितं भ
वति तावत्कालं तच्चित्तं स्वस्थाना[illegible]न्न चालयेदिति पूर्वोक्तं सविकल्पकरसं विषयप्रपंचभारत्यागजन्यं न स्वादयेन्नानुभवेत् तत्र युक्तिमाह नि
संग इति निःसंगो वैषयिकदुःखादिरहितः अतः प्रज्ञयायुक्तो भवेत् स्थिरप्रज्ञो भवेदित्यर्थः तदुक्तं भगवता प्रजहाति यदा कामान्सर्वान्पार्थ मनोग
तान् आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते तस्माल्लयादिविघ्नाभावविशिष्टचित्तस्य चिन्मात्रतयावस्थानं निर्विकल्पकसमाधिरित्यर्थः तत्र भग
वानाह यथा दीपो निवातस्थो नेंगते सोपमा स्मृता इति अथ निर्विकल्पकसमाधौ स्व[illegible] गुरूपदिष्टमार्गेण यथामति किंचिद्विचार्यते पंचभूमिकोपेतस्य
चित्तस्य भूमिकात्रयपरित्यागेनावशिष्टभूमिकाद्वयं समाधिरुच्यते कास्ता[illegible] पंचभूमिकाः क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमेताः पंच चित्तभूमिकाः
तत्रासुरसंपल्लोकशास्त्रदेहवासनानुवर्तमानं क्षिप्तमुच्यते निद्रातंद्रादिग्रस्तं चित्तं मूढमित्युच्यते कादाचित्कध्यानयुक्तं बहिर्गमनशीलम
युक्तं क्षिप्ताद्विशिष्टतया विक्षिप्तमित्युच्यते तत्र क्षिप्तमूढयोः समाधित्वशंकैव नास्ति विक्षिप्ते तु चेतसि विक्षेपांतर्गततया दूरं तु गतिबीजवच्चित्तस्य
सद्य एव विनाशात्तदापि न समाधिः एकाग्रतां पतंजलिः सूत्रयति शांतोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः अस्यार्थः शांतो[illegible] उदितो ऽतीतः
वर्तमानः प्रत्ययः चित्तवृत्तिः अतीतप्रत्ययो यं पदार्थं गृह्णाति तमेव चेदुदितोऽपि गृह्णीयात् तदा तावुभौ तुल्यप्रत्ययौ भवतः तादृश एव चित्तस्य
परिणाम एकाग्रतेत्युच्यते एकाग्रता चित्तवृत्तिलक्षणं समाधिं सूत्रयति स[illegible] तयोर्द्वयोश्चित्तस्य परिणामः समाधिरिति रजोगुणेन चा
ल्यमानं चित्तं क्रमेण सर्वान्पदार्थान्परिगृह्णाति तस्य रजोगुणनिरोधाय क्रमेण प्रयत्नविशेषवशाद्दिने दिने योगिनः सर्वार्थता क्षीयते एका
ग्रता चोदेति तादृशः चित्तस्य परिणामः समाधिरित्यर्थः अस्य समाधेरष्टांगेषु यमनियमासनप्राणायामप्रत्याहाराः पंच बहिरंगानि हिंसा
वाधतेकाग्रतया:

नकंपयेत् वासना
ह्यानंतरं चित्तं स्व
त एव प्रत्यक्प्रवणं
भवतीत्यर्थः १०
यतः ११ स्त्रव ११
स्तग ११

ॐ अहे तत्र काम्यधर्मान्निवर्त्तमोत्तहे तो निष्कर्मधर्मानियमयंति पुरस्यं तिष्ठति शौचादया नियमाः १
दिभ्यो निषिद्धेभ्यः कर्मभ्यो योगिनं यमयंति नियमयंति इत्यहिंसादयो यमाः यमनियमोरनुष्ठानवेलत्त्वणं स्मर्यते यमान्सेवेत सततं न नित्यं नियमा
यमान्बुधः यमान्पतत्यकुर्वाणो नियमान्केवलं भजन्निति बुद्ध्या यमनियमौ समौ स्यः यमवकुले षु प्रयत्नेन बुद्धिमनुसंधीत आसनप्रा
णायामप्रत्याहारा माख्याताः ध्यानधारणासमाधित्रयं मनोविषयत्वात् संप्रज्ञातसमाधेरंतरंगं यमादिकं तु वहिरंगं तथा च केनापि पुण्येनांतरंगेषु
यमं लब्धे सति वहिरंगलाभाय नातिप्रयासः कर्त्तव्यः यद्यपि पतंजलिना भौतिभूततन्मात्रेंद्रियाहंकारविषयाः संप्रज्ञातसमाधयो बहुविधाः प्रपंचि
ताः तथापि तेषां मध्ये सर्वेषां नाकाशगमनादिहेतुतया मुक्तिहेतुसमाधिविरोधित्वान्नास्माभिः तदादरः क्रियते तथा चोक्तं वाशिष्ठे श्रीरामो वाच जीवन्मु
क्तशरीराणां कथमात्मविदां वर । शक्तयो नेह दृश्यंते आकाशगमनादिकाः श्रीवशिष्ठो वाच अनात्मविदमुक्तोपि सिद्धिजालानि वांछति द्रव्यमंत्र
क्रियाकालयुक्त्याप्नोत्येव राघव ॥ नात्मज्ञस्यैष विषय आत्मज्ञो ह्यात्ममात्रदृक् आत्मनात्मनि संतुष्टो नाविद्यामनुधावति ये केचन जगद्भा
वास्तानविद्यामयान्विदुः कथं तेषु किलात्मज्ञः त्यक्ताविद्यो निमज्जति द्रव्यमंत्रक्रियाकालयुक्तयः साधुसिद्धिदाः परमात्मपदप्राप्तौ नोपकुर्वंति (
किंचनेति आत्मविषयस्तु संप्रज्ञातसमाधिर्निरोधसमाधेर्हेतुस्तस्मात्तत्रादरः कृतः अथ पंचभूमिकारूपाचित्तस्य निरोध
लक्षणः समाधिर्निरूप्यते तं समाधिं पतंजलिः सूत्रयति व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधः परिणामः इ
ति व्युत्थानसंस्काराः समाधिविरोधिनः तेषां निरोधहेतुना योगप्रयत्नेन प्रतिदिनं प्रतिक्षणं वाभिभूयंते तद्विरोधिनश्च संस्काराः प्रादुर्भवंति तथा च सति नि
रोधक्षणे कस्मिंश्चिच्चित्तमनुगच्छति सोयमीदृशः चित्तस्य परिणामो भवति यदा तदा असंप्रज्ञातसमाधिरुच्यते इत्यर्थः एतत्समाधिद्वयं जीवन्मुक्तस्यैव सं
भवति नान्यस्येति मनसि निधाय प्रथमं जीवन्मुक्तस्वरूपं प्रतिपादयितुं प्रतिजानीते अथ जीवन्मुक्तस्य लक्षणमुच्यते तस्य लक्षणमाह जीवन्मुक्तो ना
मस्वाद्ब्रह्मनिष्ठ इत्यंतेन जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृते अज्ञानतत्कार्यसंचित
कर्मसंशयविपर्ययादीनामपि बाधितत्वात् अखिलबंधरहितो ब्रह्मनिष्ठः अत्राखिलबंधरहितो ब्रह्मनिष्ठो जीवन्मुक्त इति तस्य लक्षणं जीवतः पुरुष
स्य हि कर्तृत्वभोक्तृत्वसुखदुःखलक्षणोऽश्चित्तधर्मः क्लेशरूपत्वाद्बंधो भवति तेन रहितः परिमुक्तबंधनः ब्रह्मणि निष्ठा तदेकपरिताप एकाग्रता—
स्य सः ब्रह्मनिष्ठः जीवन्मुक्त इत्यर्थः सकलबंधराहित्ये हेतुमाह स्वस्वरूपेति गुरुश्रुतिस्वानुभवैर्ब्रह्मात्मैकत्वविज्ञानेन मूलाज्ञानतत्कार्यसं
चितकर्मादीनामपि बाधितत्वात् तथोक्तं भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति ननु तादृश
स्य जीवन्मुक्तस्य देहेंद्रियादिभानमस्ति न वा आद्ये दग्धपटन्यायेन इंद्रजालनिर्मितमोधसमुद्रादवत् बाधितानुवृत्त्या मिथ्यात्वेन भाने पि पर १६
मार्थतया भानं नेत्याह अयमित्यादिना नपरपतासंतेन अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन स्थूलशरीरेणांध्यमांद्यादि पटु
त्वादिभाजनेनेंद्रियग्रामेण अशनापिपासाशोकमोहादिभाजनेनांतःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमानानि ज्ञानावि
रुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति यथा इंद्रजालमिदमिति जानन् तदिदामिंद्रजालं पश्यन्नपि परमार्थमिदमिति न प

पश्यति अस्मिन्नर्थे श्रुतिमाह सचक्षुरचक्षुरिव सकर्णोऽकर्ण इवेश्वरः आचार्यवचनेन प्रमाणयति तदुक्तं सुषुप्तवज्जाग्रति यो न पश्यति द्वयं तु
पश्यन्नपि चाद्वयत्वतः तथा च कुर्वन्नपि निःक्रियश्च यः स आत्मविन्नान्य इतीह निश्चयः इह जगति स एवात्मविन्नान्य इति मे निश्चय इत्यन्वयः
सः क इत्यपेक्षायामाह यद्दति यः कोऽपि महापुरुषो ब्रह्मात्मैकत्वसाक्षात्कारेण नि[illegible]रस्तसमस्तभेदबुद्धिः सुषुप्त्यवस्थायां यथा द्वैतं न पश्यति त
था ब्रह्मदृष्टिदार्ढ्यान्न जाग्रदवस्थायामपि द्वैतं न पश्यति तद्द्रष्टा ब्रह्मव्यतिरिक्तजडपदार्थाभावात् स तथोक्तः किंच कदाचिद् व्युत्थानदशायामवि
द्यकसंस्कारलेशावशात् द्वैतादिव्यवहारेण द्वयं पश्यन्नपि समाध्यभ्यासवशात् अद्वयत्वेन न पश्यति स च तथोक्तः यश्च लोकसंग्र
हार्थं नित्यादिकर्माणि कुर्वन्नपि आत्मनि कर्तृत्वाभावनिश्चयेन निःक्रियः कर्मरहितो भवति कर्मफलेन नालिप्यते स जीवन्मुक्तो नात्र संशयः क एष सर्वः
नन्वस्य जीवन्मुक्तस्य योगीश्वरस्य मम पुण्यपापलेपो नास्तीत्यभिमानवशाद्यथेष्टाचरणप्रसक्तिमाशंक्य परिहरति अस्य ज्ञानात् पूर्वं विद्यमानामेव आहा
रविहारादीनामनुवृत्तिवच्छुभ[illegible]वासनानामेवानुवृत्तिर्भवति अस्य पूर्वोक्तजीवन्मुक्तस्य ज्ञानात्प्रागेव श्रौतस्मार्तादिगुणेरशुभवासनाया निवारितत्वात्संसा
रदशायामप्रयत्नेन आहारादिप्रवृत्तिवत्तत्त्वज्ञानोत्तरमपि शुभानामेव वासनानामनुवृत्तिर्भवति नाशुभानामित्यर्थः ननु शुभवासनानुवृत्तेरपि
प्रयोजनाभावात् किं तदनुवृत्त्येत्यत आह शुभाशुभयोरौदासीन्यं वा तस्माज्जीवन्मुक्तस्य यथेष्टाचरणप्रसंगो नास्तीति भावः अस्मिन्नर्थे ग्रंथांतरसंवाद
यति तदुक्तं बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे इति जीवन्मुक्तस्य ब्रह्मज्ञानत्वाभिमानो नास्ति इत्यत्रापि
संमतिमाह ब्रह्मवित्त्वं तथा मुक्त्वा स आत्मज्ञो न चेतरः इति ननु विदुषां यथेष्टाचरणप्रसंगो नास्तीत्युक्तं तदनुपपन्नं मानवधेन नापि तत्वधेन यस्य ना
हंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यत इति इयमेधसंततसहस्राण्यपि च कुरुते ब्रह्महत्यादिघातलक्षाणि परमार्थवि
त्पुण्यैर्न च पापैर्लिप्यते विमलः अश्वमेधसहस्राणि ब्रह्महत्याशतानि च कुर्वन्नपि न लिप्येत यद्येकत्वं प्रपश्यति १ सभयादभयं प्राप्तस्तदर्थं यतते
वयः स पुनः सभयं गंतुं स्वतंत्रश्चेन्न हीच्छति २ प्रारब्धकर्मनानात्वाद्बुद्धानामन्यथाऽन्यथा वर्तनं तेन शास्त्रार्थे विभ्रांतव्यं न पंडितैरित्यादिश्रुतिस्म
तियुक्तवाक्यैः विदुषां यथेष्टाचरणत्वांगीकारादिति चेत् सत्यं तेषां वचनानां विद्वत्स्तुतिपरत्वेन तत्कर्तव्यमित्यत्र तात्पर्याभावात् तदुक्तं आचार्यैः अ
धर्माज्जायते ज्ञानं यथेष्टाचरणं २ ततः धर्मकार्यं कथं तस्य यत्राधर्मो विनश्यति इति नन्वेवममानित्वमदंभित्वमहिंसा क्षांतिरार्जवमित्यादिस्मृत्यु
क्तसाधनस्य अद्वेष्टा सर्वभूतानामित्यादिवचनैः प्रतिपाद्यमानाऽद्वेष्टृत्वादिगुणसमूहस्य च विदुषां संपाद्यमानत्वश्रवणात्तेन सहाविरोधमाशंक्य अ
मानित्वादिसंपादनस्य च विविदिषासंन्यासविषयत्वाद्विदुषां तु लक्षणत्वेनालंकारवदनुवर्तनान्न विरोध इत्याह तदानीममानित्वादीनि ज्ञानसाध
नानि अद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तंते जीवन्मुक्तावस्थायामिति अर्थः अस्मिन्नर्थे वार्त्तिकसंमतिमाह तदुक्तं उत्पन्नात्मावबोधस्य
ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधनरूपिणः अस्य विदुषस्तत्त्वसाक्षिणो जीवन्मुक्तस्याद्वेष्टृत्वादयो गुणाः अ[illegible]यत्नेन स्वत एव भ
वंति ननु साधनरूपिणः तं प्रति ते साधनरूपाः न भवंति तत्र हेतुमाह उत्पन्नेति यतस्तस्य उत्पन्न आत्मावबोधो ब्रह्मात्मैकत्वनिश्चयरूपः ततस्तस्य ते गु

णः लक्षणत्वेनैव भवंतीत्यन्वयः इयता प्रतिबंधेन प्रतिपादितेऽस्मिन्वेदांतसाराख्ये ग्रंथे श्रीमत्परमगुरुपरमहंसपरिव्राजकाचार्यसदानंदयोगींद्रेण महा
पुरुषेण यद्वेदांतो नामेत्यारभ्य साधनचतुष्टयसंपन्नस्य प्रमातुरधिकारिणः मूलाज्ञाननिवृत्तिपरमानंदप्राप्तिसिद्धये प्रतीयमानाविषयकस्य कलप्रप
चजातस्य ब्रह्मण एवाध्यारोपापवादपुरःसरं सविस्तरं निःप्रपंचत्वं प्रतिपाद्य तत्साधनं च श्रवणादिकं सप्रपंचमभिधाय तस्यैवाधिकारिणस्तत्त्वमस्यादिवा
७ क्यश्रवणानंतरं ब्रह्मात्मैकत्वसाक्षात्कारेण निरस्तसमस्तभेदबुद्धेर्जीवन्मुक्तत्वं प्रदर्शितं एतावतैव कार्यसिद्धेः किं बहुलिखितेनेति मनसि निधाय
संप्रति स्वयं जीवन्मुक्तस्य स्वप्रकाशात्मानंदानुभवैकनिष्ठस्य भेदप्रतीत्यभावेपि प्रारब्धालेशवशात्प्रारब्धकर्म भुंजानो भिक्षाटनादिदेहयात्रामात्र
17 क्रियावशिष्टो ब्रह्मीभूत एवावतिष्ठत इत्युपसंहरति किं बहुनेत्यादिना किं बहुनायं देहयात्रामात्रार्थमिच्छाऽनिच्छापरेच्छाप्रापितानि सुखदुःखलक्षणा
नि प्रारब्धफलान्यनुभवन्नंतःकरणाभासादीनामवभासकः सन्तदवसाने प्रत्यगानंदपरब्रह्मणि प्राणे लीने सति अज्ञानतत्कार्यसंस्काराणामपि वि ण
नाशात्परमकैवल्यमानंदैकरसमखिलभेदप्रतिभासरहितमखंडब्रह्मावतिष्ठते प्रारब्धं त्रिविधं स्वेच्छाकृतं भिक्षाटनादि समाध्यवस्थायां शिष्यादिभिर्दीय
मानमन्नादिकं परेच्छाकृतं समाध्यवस्थायां व्युत्थानदशायां वा आकाशफलपातवदकस्मात्जायमानं पाषाणपतनं कंटकवेदनादिकमनिच्छाकृतं स चा
यं जीवन्मुक्तः प्रोक्तत्रिविधप्रारब्धप्रापितं सुखदुःखमनुभवन् बुद्ध्यादिसाक्षितया सर्वावभासकः सन् भोगेन प्रारब्धकर्मक्षये सति प्रत्यगभिन्नपरमा
त्मनि प्राणादिलयानंतरं पुनरविद्याविषयकसंसारहेतुकृतकलुषसन्गलितसकलभेदप्रतिभासो ब्रह्मैवावतिष्ठते इति सकलवेदरहस्यतात्पर्यमित्यर्थः अयं
जीवन्मुक्तो बुद्ध्याद्युपाधिविलये सति घटाद्युपाधिविनिर्मुक्ताकाशवन्मुक्त इत्युपचारव्यवहारभाग्भवति बद्धत्वस्याप्यवास्तवत्वात् तदुक्तमाचार्यैः
न रोधो न चोत्पत्तिर्न बंधो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता १ अस्य जीवन्मुक्तस्य उपाधिविगमसमये प्राणस्वालिंगशरीरं त्र
तितप्तलोहक्षिप्तनीरबिंदुवत्प्रत्यगभिन्ने परमानंदे लीनत्वात्स्थूलशरीरं नोत्तिष्ठतीत्यत्र श्रुतिमाह न तस्य प्राणा उत्क्रामंत्यत्रैव समव
लीयंते विमुक्तश्च विमुच्यत इत्यादिश्रुतेः अयं जीवन्मुक्तो जीवन्नेव रागद्वेषादिबंधनाद्विशेषेण मुक्तः सन् वर्त्तमानदेहपाते सति भाविदे
हबंधनाद्विशेषेण मुच्यत इत्यत्रापि श्रुतिमाह विमुक्तश्चेति तदुदाहरणे केपि यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म स
मश्नुत इति वासिष्ठेपि जीवन्मुक्तपदं त्यक्त्वा स्वदेहे कालसात्कृते विशत्यदेहमुक्तत्वं पवनोऽस्पंदतामिवेति असंगो ह्ययं पुरुष आकाशवत्सर्वगतश्च
नित्यः अस्माविरं पुरुषमपापविद्धमित्यादिश्रुत्या प्रसंगात्मनोनित्यत्वपरिहारः विकूटस्थत्वश्रवणात् उत्पत्त्याप्तिविकृतिसंस्कारास्तु चतुर्विधा क्रियाफ
लविलक्षणत्वेन विषयानित्यानिहस्य अविद्यानिवृत्तिमात्रेण प्राप्त एवात्मा पुनः प्राप्त इत्युपचर्यते अधिष्ठानस्यागमनाभावे अध्यस्तस्यलोकांतरगम
नाद्योगात्सालोक्यादि मुक्तिसंभवः नन्वप्राप्तस्य क्रियासाध्यस्य वस्तुनो विद्यमानाभावे न पनिवृत्तेश्च पुरुषार्थत्वं दृष्टं अत्र तदभावात्कथं पुरुषार्थ
त्वमिति चेन्न तयोरेव पुरुषार्थत्वमिति नियमाभावात् स्वच्छायायामारोपितवेतालत्रासो विस्मृतकंठगतचामीकरस्य भ्रांतपुरुषस्य प्राप्तवा कोन तयो ७
र्निवृत्त्यवाप्त्योरपि पुरुषार्थत्वदृष्टेः अत्र संग्रहः आत्मा ज्ञानमतेर्निरस्तममतं प्राप्यं च तत्संपर्कं कंठस्याभरणादिवद्भ्रमवशात् छायापिशाची यथा

आप्नोत्याविनिद्व्यत्रिवश्रुतिशिरोवाक्यानुरोधेकल्पितात् ब्रह्मध्यानानिरासतः परस्तु खं प्राप्तं तयोक्ष्यते इति न च मुक्तानामपि वसिष्ठभीष्मप्रभृ
तीनामपरोक्षज्ञानिनां पुनर्देहांतरश्रवणात् केवलं ज्ञानोत्पत्तिसमय एवास्मज्ज्ञानानामस्माकं मुक्तिर्भवतीति कथं विश्वसिमः अतो ज्ञानव्यतिरिक्तकर्म
प्युपायांतरं किंचित् कर्तव्यमिति वाच्यं शास्त्रप्रमाण्यादेव तदुपपत्तेः ब्रह्मविद् ब्रह्मैव भवति तरति शोकमात्मविदित्यादिश्रुतिभिर्ज्ञानोत्पत्तिसमय एव मुक्ति
प्रतिपादनात् तदुक्तं प्रबोधेन तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि परित्यजन् देहं ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इति वसिष्ठादीनां त्वा ९
धिकारिकपुरुषत्वेन यावदधिकारं प्रारब्धवेगप्रयुक्तशापादिना स्वीकृतानां तत्तद्देहप्राप्तावपि तद्देहभाविभोगस्य निवारयितुमशक्यत्वात् प्रारब्धस्य ˇनां देह
विनाभोगेन क्षयानुपपत्तेः यावदधिकारमवस्थितिराधिकारिकाणामिति भगवद्व्यासेन निर्णोपितत्वात् अस्मदादीनां च प्रारब्धकर्मणो नैकदेहा
रंभकत्वसंभवेपि चरमदेहं विना परोक्षज्ञानोत्पत्तेरसंभवात् वामदेवे तथा दृष्टत्वात् अन्यथा गर्भस्थस्य श्रवणाद्यभावेन ज्ञानोत्पत्त्यनुपपत्तेः ननु
ˇनाभावश्रवणात् दे हांतरप्राप्तिस्तु तदं तरप्रतिपत्त्याविदु वदेहान्तिगनि ज्ञानिनामपि स्वप्नावस्थायां देहांतरस्वीकारवन्मुक्तानामपि पुनर्देहांतरस्वीकारः किं न स्यादिति चेन्न कंठस्थस्वप्नेस्माविशदित्यादिवाक्येषु कंठान्नि
र्गमेन श्रवणादेषम्य तदुक्तं स्कांदे यस्मिन् देहे दृढं ज्ञानमपरोक्षं विजायते तद्देहपातपर्यंतमेव संसारदर्शनं १ पुरा विनास्ति संसारदर्शनं परमा
र्थतः कथं तद्दर्शनं देहाविनाशाद् विमुच्यते २ तस्मात् ब्रह्मात्मविज्ञानं दृढं चरमविग्रहे जायते मुक्तिदं ज्ञानं प्रसादादेव मुच्यत इति ३ तस्मात्सु
ष्ठूक्तं विमुक्तश्च विमुच्यत इति नित्यशुद्धपरपूर्णमद्वयं सच्चिदात्मकमखंडमंतरं सर्वदा सुखमबोधतत्त्वदैर्वर्जितं सदहमस्मि तत्परं २ गोवर्द्ध
नप्रेरणया विमुक्तक्षेत्रे पवित्रे नरसिंहयोगी वेदांतसारस्य चकार टीकां सुबोधिनीं विश्वपतेः पुरस्तात् १ जाते पंचशताधिके दशशते संवत्
सराणां पुनः संजाते दशवत्सरे प्रभुवरश्रीशालवाहे शके प्राप्ते दुर्मुखवत्सरे शुभशुचौ मासे नवम्यां तिथौ प्राप्ते भार्गववासरे नरहरिष्टीकां च
कारोज्ज्वलाम् इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमत्कृष्णानंदभगवत्पूज्यपादशिष्यनृसिंहसरस्वतीकृतवेदांतसारटीका
संवत् १८५९ मासे माधवे कृष्णपक्षे शुभतिथ्यां द्वादश्यां गुरुवासरान्वितायां नाभानामपुरे वेदांतसारस्य टीका नाम्ना सुबोधिनी गोकु
रसभचंद्रेण लिखित लेखकपाठकयोः शुभं भवतुतराम्

१८
18

वेदान्त

८